राजन्महाभूतलब्रह्मलोकपितामहः ॥१॥ जपन्मंत्रंतपस्तीव्रं करोतिमुनिभिः सह ॥ अचिरात्श्रीप
तिर्विष्णुरधिभूतोभविष्यति ॥२॥ त्वमप्यत्रशुचिर्भूत्वास्नात्वापुष्करणीजले ॥ जपःकुर्वन्महीपा
लनिवसत्वमिहप्रभो ॥३॥ इत्युक्तःप्राहराजापिमंत्रंकंचित्प्रयच्छमे ॥ इतिपृष्टोवशिष्ठेनप्रादान्मंत्रमनुत्तमं ॥४॥ श्रीमद्दशाक्षरंमंत्रंव्यंकटेशपराख्यं ॥ लब्ध्वामंत्रंमहाप्राज्ञःसंकल्प्यंयंत्रसंयुतं ॥५॥ स्वामिपुष्कर
णीतोये स्नात्वाविधिवदाचमन् ॥ क्वचित्रसमदेशेलिखित्वायंत्रमुत्तमं ॥६॥ तत्रविष्णुसमभ्यर्च्यश्रीनि
वासंजगद्गुरुं ॥ तदग्रेतोजपंकुर्वन्नसन्निष्ठपरमासने ॥७॥ वशिष्ठोपिजपन्मंत्रंअसंख्यकुशविस्तरान्त
रांतरेमहाराजः कश्चित्समुपपद्यत ॥८॥ किमित्याहकुलेःसर्वैर्वीक्षितंमुनिसत्तमैः ॥ दुर्निरीक्षंमहा

तेजोदृष्ट्वासुरसत्तमैः ॥९॥ समस्तविद्युतांपुंजमाविर्भूतमिवाभवत् ॥ ज्योतिर्गणानांसंघातमि
वतेजसमुत्तमं ॥१०॥ अनेककोटिसूर्यैश्चपूर्णचंद्रैश्चकोटिभिः ॥ एकीभूयसमुद्भूतमिवतेजःससस्मि
तं ॥११॥ न्यमिलंयंतनिर्नाणिसमुत्तस्थुश्चतेसुराः ॥ सभ्रांतमनसःसर्वेसमुद्दीप्तेयेसुराः ॥१२॥ अति
ष्ठन्विविधान्मंत्रान्जपंतोयोगिनोमलाः ॥ तत्तेजसाजगत्सर्वंप्रदीप्तमिवचस्थितं ॥१३॥ तेजोमयस
मुद्भूतंविमानंसूर्यभास्वरं ॥ अनेकगोपुरैर्युक्तंअनेकावरणैर्युतं ॥१४॥ तस्यहाटकनिर्वृत्तकपाटद्वयसं
वृतं ॥ नीलैर्मरकतैश्चैवरत्नतोरणसंयुतं ॥१५॥ उच्चध्वजपताकैश्चशोभितंविविधैरपि ॥ चातकुं
भमयैःकुंभैःशोभितोच्छ्रायगोपुरैः ॥१६॥ अलंकृतविमानेश्चचित्रितैर्वर्णभेदतः ॥ लंबमानैर्यथामु
क्तादामैश्चामरसंभवैः ॥१७॥ मल्लिकामालतीजातिपुर्ष्पाणांचसृजैस्तथा ॥ सुवर्णचित्रितैर्वस्त्रैर्लंबमा
नैरलंकृतैः ॥१८॥ अनेकमणिरत्नार्थंक्रीडामंडपसंयुतं ॥ अस्खलंमंडपांतस्थंमणिस्तंभसुशोभितं ॥
१९॥ अथास्वगजमुख्येश्चदिव्ययानैःस्वलंकृतः ॥ सारिकाशुकहंसानांमयूराणांस्वनैर्युतं ॥२०॥
कपोतमधुरालापैर्विचित्रमधुपस्वनैः ॥ शोभितंचसुगंधैश्चधूपैश्चाविरतंभृशं ॥२१॥

भेरिमृदंगपणवमरुजस्वनसंयुतं॥टंकानिःसाणसंनादसंपूरितदिगंतरं॥२२॥विणाकिंनरभे
दानांमंजुलस्वनसंयुतं॥रूपयौवनसंपन्नदिव्यस्त्रीजनसंयुतं॥२३॥चामरव्याहिणीभिश्चछत्रै
रन्याभ्यश्चशोभितं॥गृहीतव्यजनाभिश्चरूपयौवनशालिभिः॥२४॥नीराजनकराभिश्चमाभि
परिसेवितं॥पत्रध्वजकराभिश्चस्त्रीभिसेवितमादरात्॥२५॥अत्यंतमद्भुतंदिव्यंविमानंदृष्ट्वा
सुराः॥अस्मादृशास्तदादेवाःसनकाद्याश्चयोगिनः॥२६॥मुनयोगंधर्वाश्चदृष्ट्वातंपरमाद्भु
तं॥इतिकर्तव्यमूढास्तेषान्हृदमानसाः॥२७॥तस्थुस्तथैवपश्यंतोमुनयःस्मयसंभ्रमाः॥अकं
राद्यादेवाविहंगापक्षिणस्तथा॥२८॥मृगाश्चपशवःसर्वेविमानंदिव्यमुत्तमं॥दृष्ट्वाविस्मयस
फुल्लोचनापुण्यमानसाः॥२९॥चेलुस्तस्मात्सदनैवतस्थुस्तत्रैवसादरं॥अत्यद्भुतंविमानंतं
दृष्ट्वालोकपितामहः॥३०॥परमानंदसंफुल्लमुखलोचनपंकजाः॥अगस्त्यश्चवशिष्ठश्चवामदेवश्च
कश्यपः॥३१॥जाबालिमथकण्वश्चदेवलोदेवदर्शिनौ॥स्वपुत्रंनारदंचैवपराशरमुनिंतथा॥३२॥
व्यासंशुकंतथागार्ग्यंभार्गवंच्यवनंतथा॥अन्यानपिमुनूपुण्यानिंद्राद्यान्विबुधांतथा॥३३॥

सनकादिमहायोगीन्समाहूयदमब्रवीत्॥इदंतुदिव्यंपरमाद्भुतंशुभंविमानमिंद्रादिनिसेव्य
मानं॥३४॥विभातिविष्णोरवमंदिरंत्सरयामसर्वेवयमद्भुतंमहो॥इतिरपित्वाप्रविवेशतद्गृहं
तामहःसर्वेजगत्पतिस्तथा॥३५॥तथैवसर्वेविविधास्तपोधनास्तदेवगेहंविविशुश्चयोगिनः॥
इतिश्रीवराहपुराणेस्तेव्यंकटेशमाहात्म्येचतुर्दशोध्यायः॥१४॥ ॥सूतउवाच॥अतीत्यप्रथ
मंद्वारंरत्नतोरणभूषितं॥चंडप्रचंडौद्वारेशौरक्षकौगदान्वितौ॥१॥तप्तहाटकसंपन्नकपा
टद्वयशोभितं॥द्वारपालौप्रणम्यैवह्रीतौयंद्वारमाविशत्॥२॥तथैवसप्तद्वाराणिसमती
त्यमहाभुजः॥चतुर्मुखमुखाःसर्वेतत्रदेवाःश्रियःपतिं॥३॥ददृशुस्तत्रसंहृष्टाःसहरात्रौम
हामनाः॥विमानेबहुविस्तीर्णेसिद्धचारणसेवितं॥४॥पुष्पवृष्टिमहत्यासीद्देवदुंदुभिनिस्वनः
॥अकांडेसुमहानासीत्तूर्यमंडलमुत्सवः॥५॥तुष्टुवुर्देवगंधर्वाविमानस्थाप्सरोगणाः॥नन्दंतु
गीतिवादित्रासंभ्रमःसुमहानभूत्॥६॥त्रैलोक्यपूरितंतेनसंभ्रमेणतदाभवत्॥वादित्रैस्त्रोक

पालोश्च वसवोमुनयस्तथा ॥७॥ सर्वेग्रहास्तथारुद्राविधयोदेवतानघाः ॥ नानागायक्षास्तथास
र्वेयेचान्यसात्विकामलाः ॥ ९॥ अजमुजंगदीप्तानं दृष्टमच्युतमीश्वरं ॥ ब्रह्माणंतेपुरस्कृत्यदद
शुर्भास्करोपमं ॥ १०॥ नीलमेघनिभश्यामंनिलमाणिक्यविग्रहं ॥ तप्तहाटकसंकाशंचंपकोद्द
मभानिभं ॥ ११॥ पंकजोदरलावण्यहारिद्रागर्भसन्निभं ॥ रात्र्यूर्णनिशाकांतमंडलाचलस
मुखं ॥ १२॥ भृंगपुंक्तिसमस्तेश्चपृथुव्याल सुशोभितं ॥ ईक्षुपंकजसेरमुखमंडोस्मि
तोज्वलं ॥ १३॥ किरीटहारकटकेयूरांगदशोभितं ॥ तरुणारुणसंकाशंकुसुंभवसनोज्वलं
॥ १४॥ धामपार्श्वेलसद्वेमनीलांबुजमनोहरं ॥ वलयांगदसंशोभिलंबमानाल्यपाणिकं ॥
१५॥ पद्मासनेस्थितंपद्मापार्श्वदक्षिणमाश्रितं ॥ वीक्षमाणंकटाक्षेणमुहुःश्रीवत्सलांछनं
॥ १६॥ श्रीधरंवामपार्श्वस्थंतुलसीविमलांगकं ॥ सर्वेसहावसुमतीसर्वाभरणभूषितां ॥ १७॥
द्विजराजद्विजज्योत्स्नामनोहरिमनोहरं ॥ मदमत्तचकोराक्षीफुल्लपंकजवत्सकां ॥ १८॥

धामेकरत्नलोभोज्यघटत्ननीलसरोरुहं ॥ २॥ यामामनुपमांभूमींचर्णपद्मासनस्थितं ॥ १९॥ क
टाक्षंयंत्रलोकेशंमाकेकरसुवीक्षणैः ॥ ददृशुःब्रह्मरुद्राद्यास्त्रिदशामुनयस्तथा ॥ २०॥ योगिन
श्चतथाराजासकलेद्रोमहद्युतिः ॥ नानारत्नसमाकीर्णज्वलन्मुकुटशोभितं ॥ २१॥ मंदस्मितमनोहारीश्र
मुखचनपंकजं ॥ दृष्ट्वालोलत्तरंगाढ्यपुलकंपंकजलोचनं ॥ २२॥ सुनासिकापुटस्मेरपूर्णेंदुमुखमं
डलं ॥ कर्णद्वयलसद्धेममकरस्थवणोज्वलं ॥ २३॥ कुंटलंविंसद्भृंगेवेयकविभूषितं ॥ तप्तकार्तस्वरो
द्भूतब्रह्मसूत्रविराजितं ॥ २४॥ केयूरांगदसंभूषावृत्तायतभुजंज्वालायुतसहस्रार्कसुदर्श
धरंपरं ॥ २५॥ शरच्चंद्रप्रतिकाशंपांचजन्यधरंशुभं ॥ अग्रतोवरदानोद्यद्दक्षपाणिसरोरुहं ॥ २६॥
कटितटसुविन्यस्तवामपाणिजलोरुहं ॥ लावण्यसिंधुमपरंमहदावर्तनाधिकं ॥ २७॥ सर्वलोकेस माधु
यजठरलेकृतेहरिंकटिसूत्रव्यतिस्फूर्तेकिंकिणीकविराजितं ॥ २८॥ कटितटसुसद्बुध्नुरिकायुधभु
षितं ॥ मरद्विपमहास्कंधं समरुद्वयं ॥ शोभितं ॥ २९॥ मदनेषुधिसरोभिज्जघद्वयविराजितं ॥ पीतांबर
धरंकांसापितांबरजत्रयं ॥ ३०॥ गुल्फदेशेश्वेतबद्धकिंकिणीकटकादिकं ॥ हंससिंजितमंजूलनूपुराढ्यपदांबुजं ॥ ३१॥

बालचंद्रकलाशोभिनखपंक्तिविराजितं ॥ सहस्रपत्रपत्रस्थसर्वाभरणभूषितं ॥३६॥ पारिजातनतरो
र्मूलेभासमानंश्रीयःपतिं ॥ कोटिकंदर्पलावण्यसंमोहितजगत्त्रयं ॥३२॥ योवनोद्दामलावण्यंपं
चविंशतिहायनं ॥ कुमारराजसिंहस्यइवक्रीडंतमच्युतं ॥३३॥ मूर्तिमंतंदयासिंधुंमूर्ति
मंतंक्षमंगुणं ॥ मूर्तिभेदमहोदार्यमूर्तिमद्भयसंभ्रमं ॥३४॥ नारायणमनंताद्यमव्ययंपुरु
षोत्तमं ॥ ददृशुर्देवगंधर्वाप्रत्यक्षसुरसत्तमाः ॥३५॥ दृष्टेप्रत्यक्षतोयस्मिंस्तेपुलकोद्गमाः ॥ त
मजंदेवदेवेशंशृंगाररसवारिधिं ॥३६॥ चक्षुषांफलमत्यर्थंददृशुःप्रीतमानसाः ॥ नयना
नंदजननंदृष्ट्वातंस्वयंभुवं ॥३७॥ सर्वेषांनेत्रयुग्मानिधिक्कारंप्रापुरंजसा ॥ हर्षवेगसमाक्षाद्द
दृशुःतस्ययोगिनः ॥३८॥ मुनयश्चतथाचान्येननृतुश्चाप्सरोगणाः ॥ निपतंतिपतंत्यन्येभ्रमंत
भ्रमयंतिच ॥३९॥ उत्पतंत्युपतंत्यन्येहर्षपर्याकुलाकराः ॥ अनंदाश्रुकलापूर्णामदोन्मत्तइवाभ
वन् ॥४०॥ अनुभूयतमानंदंचिरात्स्वस्थागतज्वराः ॥ तुष्टुवुर्देवदेवेशंविस्मयमाणाःपुनःपुनः ॥४१॥ इतिश्रीवरा॰
पंचदशोध्यायः ॥१५॥

॥ सूतउवाच ॥ अथतेमुनयःसर्वेहर्षोत्फुल्लाश्चयोगिनः ॥ स्तुत्वागम्यस्तुतिंप्रीतंप्रीत्यर्थंतुष्टुवुर्मुदा ॥१॥ भग
वन्नमस्तेयज्ञरूपायेयज्ञभोक्त्रेनमोनमः ॥२॥ यज्ञगोप्त्रेनमोयज्ञप्रियायज्ञनमोनमः ॥ विश्वामि
त्रमहायज्ञपालनायनमोनमः ॥३॥ यज्ञश्चाङ्गंचदानंचकर्माण्यन्यानियानिच ॥ तेषामपिफलंमेकः समर्थोज
नकर्मणि ॥४॥ फलदानेचप्रभुरित्युच्यतेबुधैः ॥ नकेवलंदेवेशकर्तानोकर्मणाप्रभुः ॥५॥
अन्योदेशेकृतानांचयज्ञानांत्वंप्रभुस्तथा ॥ आदावंतेतथामध्येत्वंज्ञानानुस्मरेणयत् ॥६॥ क्रतोम
ध्यफलंकर्मत्वय्यानाधातिपूर्णतां ॥ कर्मणेवहिसुप्रीतःफलंधर्मंददातिच ॥७॥ अर्थंकामंतथा
मोक्षंददासिचफलप्रियः ॥ वेदेषुबहवोभागाःकर्माण्येवयदंतिच ॥८॥ तान्येवहितवप्रीतिःकरा
णीतिपुराविदः ॥ यथावेतानिकर्तुंचनराक्षमंतीहिसर्वशः ॥९॥ अस्माभिःक्रियतेयज्ञोदानो
शुध्याहिकर्मतत् ॥ कर्माछिद्रंतपछिद्रंत्यक्तोपेक्षितंचयत् ॥१०॥ तत्सर्वंक्षम्यतांदेवश्रीनि

नियास:क्षमोदधे॥इतिताभिस्तुतोविष्णोमुनिभिश्चतपोधनैः॥७॥इंद्राद्यादेवताःसर्वेतुष्टुवुर्नग
दीश्वरं॥इंद्रादयऊचुः॥ॐनमोध्यंकटेशायरोषाद्रिनिलयायच॥१२॥सिंह्याचलनिवासायश्री
मन्नारायणायच॥केशवायनमोनित्यंवासुदेवायतेनमः॥१३॥हृषीकेशायमधुतेवामनायन
मोनमः॥सर्वेषांप्राणिनांस्वामिन्निवासार्थंयथातथं॥१४॥उद्धृत्यंपातालात्स्थापयित्वाहंपुनः॥ स्व-
ऊचुर्गरुडंसर्वेप्रत्यक्षंदृश्यतांगिरौ॥१५॥सुराणामुदधिर्यत्नान्निर्मथ्योत्पाद्यतामृतं॥
ऽरक्षस्वैसुरान्सर्वान्दत्वापीयूषमादरात्॥१६॥तवैतास्वर्वदास्वामिन्वराश्चैवसुरेश्वर॥त्व
त्स्वरूपंयथात्मानंकेनशक्यंरमापते॥१७॥ क्वचित्स्वल्पमूर्तित्वंस्वल्पाक्षः स्वल्पपात्॥कदा ॥२७॥
चिद्भुंक्षेत्वंकदाचित्तुयत्नभुजः॥१८॥कदाचित्तुतवस्यात्मानंकिंचिच्चरणादिकं॥आकाशादि
वतेरूपंकदाचित्त्वंगोचरः॥१९॥कतिचिन्निर्गुणंकस्यनवेद्यंयत्तेनकस्यचित्॥उच्यतांस्वामिगुणं २ रा
केचिन्निर्गुणंमानमात्मकं॥२०॥किंचिदित्येवकेचित्तुसदित्येवेतिकेचन॥दिव्यावयवसौंदर्यनि

त्यमित्यविशेषिणः॥२१॥वदंतिकेचिदस्माकंअपिलम्बलउत्तमं॥हृत्पद्मप्रमाणंभावयेत्तन्मतास्म
जगत्पते॥२२॥एवंहिस्तूयमानेतुगोविंदेमुनिदैवते॥तुष्टुवुस्तंमहाभाग्यायोगिनोविजितेंद्रि
याः॥२३॥ब्रह्मादयऊचुः॥नमोवेंकटनाथायनिवासायजगत्पतेवासुदेवायतेनित्यंजगद्रूपेनमोस्तुते
मसेविने॥२४॥अथारूपंहृत्पद्मेभ्रूमध्येमूर्ध्निपंकजे॥नित्यंस्मरंतिवेदज्ञाःसर्वतोमु
खं॥२५॥सुषुम्नामार्गमध्येतुस्थितंतेतुनिभंपरं॥नयात्मानंयतोवेद्यंतंयतोभ्यस्वरूपकं॥२६॥
स्वयंप्रकाशरूपंचसमाधौत्वांनमामहं॥योगीनांपरमाधारंयोगिनांयोगदायिनं॥२७॥यो
गीनामप्यगम्यंचनमस्यामोजगद्गुरुं॥हृत्पद्मकर्णिकामध्येसंस्थंचक्रगदाधरं॥२८॥नीत्वात्मा
नंसंकाशंपीतवाससमच्युतं॥नमोस्तिवेधदेयंतेयंवदस्यविषयंतथा॥२९॥प्रजाम:सर्वभावेन
सर्वदाशरणंपरं॥इतिस्तुतेजगन्नाथेयोगिभिःकोसतापिवः॥३०॥तुष्टावहृष्टस्तंदेवंराजादश
रथस्तथा॥दशरथउवाच॥अत्रेत्रप्रमुखाःसर्वेतपःकुर्वंतित्यस्तते॥३१॥तदधीमारमासातु

त्वत्प्रसादाभिकांक्षिणी॥ त्रिपुरारेमहाविष्णोस्त्रोकसंहारकारण॥ ३२॥ येनदग्धापुरातेनतुत्यवा
युबधाभिस्मृतं॥ सर्वरुद्रक्रियाकर्त्रीबलाधादेवतागणाः॥ ३३॥ त्वदाज्ञाकारणःश्रीशा
रितकश्चित्वदाधिकः॥ त्वदीयेधामयेकुंठेनिरूपाधेनिराकुले॥ ३४॥ सर्वेप्रार्थ्यपरानंदमक्ष्यंक्षि
सुखत्परं॥ एवंरूपेणगोविंदस्तूयमानेश्चलुर्मुखः॥ ३५॥ चतुर्भिस्तोषयामासमुमुखैश्चसुगोपि
भिः॥ ब्रह्मोवाच॥ ॐनमोदेवेसदश्यक्षसर्वनारायणअजः॥ ३६॥ अपोरसजलातोयीयेविरुद्ध
लासुतेनवै॥ तदंडेमभवत्पश्चात्वयासृष्टोऽमीश्वरः॥ ३७॥ मयासृष्टाःप्रजाःसर्वाःसर्वमूर्त
त्वमेवहि॥ ताहशोविधयाज्ञातास्त्वत्तःकलिकलौप्रभो॥ ३८॥ जीवरूपैश्चैःप्रकृत्यात्मविभिन्नक
स्त्वंतुकारणं॥ त्वमेवसर्वभूतात्माजगदित्युच्यतेश्रुतौ॥ ३९॥ एवंवक्ष्यंसमासाद्यसुपर्णोपतुतंहरेः॥
तयोरन्यःकर्मजन्यफलमश्नातिसर्वदा॥ ४०॥ अस्यसृष्टंगंधरत्नैवदिव्यसेवंयथारवेः॥ नि
यंतासर्वदेवानांप्रेरकश्चानुमोदकः॥ ४१॥ सत्यंज्ञानमनंतंचलक्ष्मीपतिःपरानंदाश्च

तगुणःदेवगंधर्वसेवकाः॥ ४२॥ इत्यादिस्तवस्तोतुंमानदःकमलापतेः॥ उपक्रम्यपरिक्रुंच
वानंदगुणार्णवं॥ ४३॥ अजानंदपुरावेदालेचविद्यासरूपधृक्॥ तृप्तोभवन्यतुःखोवित्तज्ञानि॥
कमलोद्भवः॥ ४४॥ कथंस्तौमिगुणस्थीरपयोधित्यांशयापतेः॥ दयोदिरुमुखाभोजदर्शनां रमा
लेयंसुराः॥ ४५॥ अवदिःस्थाप्रिंचिन्तुलसमर्पिस्यंतोषितिः॥ प्रसीदपरमोदारप्रसीदत्वंश्री
यःपतेः॥ ४६॥ इतिदेवगणाःस्तुत्वाकुरु हृदांबुजः॥ अस्तवन्वरदेवदेवेशंपथात्मानिबुधाः
स्मृताः॥ ४७॥ ॥ इतिश्रीवाराहपुराणेश्रेमद्भाषाव्यंकटाद्रिमहात्म्येनोऽशोध्यायः॥ १६॥
सुतउवाच॥ मुनिभिर्वेदमंत्रैश्चस्तुतिश्रीव्यंकटाधिपः॥ दयाप्रसन्नसत्फुल्लनेत्राभ्यांविलोक्य
यत॥ १॥ तारस्वरसुधापूर्णयाहृदयंनिर्वृतंभवेत्॥ बभाजेवेदगंभीरवाचाकर्णाह्व
ताश्रियः॥ २॥ श्रीभगवानुवाच॥ ब्रह्मन्प्रीतोस्मितेभक्त्यास्तुत्याचकमलासन॥ किमागमन

कार्यैलत्सुराणांचतापसिनो॥३॥इतिपृष्टः पुनःप्राहब्रह्मालोकपितामहः॥ब्रह्मोवाच॥पूर्वंविश्रवसः पु
त्रोराक्षणोनामराक्षसः॥४॥तपःकृत्वासुघोरंवैदेवदानवराक्षसैः॥अप्रमृष्यैस्तथाचान्यैस्तथाध्या
त्वाध्यनादरैः॥५॥बलदर्पादिमान्लोकान्बाधतेनित्यशोनितान्मुनीन्॥श्रीरौलस्यसकलान्दैत्या
केचनसर्वदा॥६॥बलोद्भूतामलावेगाःनित्यब्राह्मणकंटकाः॥बाधतेप्राणिनःसर्वान्नित्योद्भूतबल
युधाः॥७॥यैकुंठंक्षीरसिंधुंचदृष्ट्वात्यप्रीतिकारकं॥तत्रस्थानंसमालोक्यलीलालोककृतेवपुः॥८॥
योलुतश्रीयःकांतंअदृष्ट्वाभर्तृयंयदं॥आगतास्तारणंत्वांहित्वमेवरिपुसूदनः॥९॥जगद्रक्षण
कृतांब्रह्मेंद्रसृज्यरमासखः॥अस्मच्चैवरथंदिव्यंगिरावस्मिन्नृजाजिरे॥१०॥क्रीडसेपरमानंदश्री
धरसवक्षगुणः॥अस्माकंकागतिर्विष्णोवरध्वंकटनायक॥११॥इत्याकर्ण्यब्रह्मलान्सर्वान्कृपाभि ॥१२९॥
रीक्षणः॥श्रीभगवानुवाच॥अहमेवगतिर्बलेनयतांसाधकानृणां॥१२॥अभयंसकलांदरा
मयाहिकेअचिराद्राक्षसंक्रूरंरावणंलोककंटकं॥ससबंधुंसरथंसाश्वंवधिष्यामिनसंशयः॥१३॥

एवमुक्त्वाविधिंश्रीशःप्रागतस्यंतपोधनं॥आगत्यस्वागतंतेहिऋषिकार्यंतथामुने॥१४॥इ
त्युक्तःप्राहतंविष्णुमुनिःपरमपावनः॥अगस्त्यउवाच॥मेदस्मितमनोहारित्वदीयंमुखपंक
जं॥१५॥सदयःसेवितुंहृदयात्कादकारकं॥अदृष्ट्वात्वत्कथंस्थातुंशक्नुयाध्यंकदेश्वरं॥
॥१६॥त्वदीयदर्शनंपुण्यंममोदेशंप्रधानतः॥अतश्चकिंचिदृष्ट्वाभिश्रयतांपुरुषोत्तम॥
॥१७॥असुराकेचिदुद्भूताःश्रीरौलस्यसमीपतः॥वरदानंप्रतास्तेबोधंतेप्राणिनस्त्व
रा॥१८॥सत्यंप्रत्ययकानित्येदेवापीडाकथंभवेत्॥विजयायेत्वदीयास्तुबालवृध्दद्विजाक्ष
माः॥१९॥दस्युभिःपीड्यमानास्तुउपेक्षाविषयःकथं॥दुष्टानांनिग्रहःकार्यशिष्टानांरक्षणं
तथा॥२०॥भयेहेतोर्जनाःसर्वेविरोगाविगतज्वराः॥दीर्घायुषस्तथासर्वेश्रीवत्सःपुत्रपौत्र
काः॥२१॥निर्भयास्तेभवेयुश्चभवदीयकटाक्षतः॥वरंमेदेहिदेवेशमामवश्यंश्रियःपतेः॥२२॥
इतिपृष्टःपुनःप्राहपरमात्मासनातनः॥श्रीभगवानुवाच॥दत्तमेघवरंचाद्यमयामुनिवरोत्तम॥२३॥

रुक्मिण्यसर्वदुष्टेभ्यकरिष्येनिरुपद्रव॥अरोग्येसंपदोनानासेतांश्चतथायुषे॥२४॥दास्यामिसर्व
दातेषांएतादृषयआसिनां॥सनकादयुवाचेदंस्वागतंभवतामितो॥२५॥इतिपृष्टःपुनःप्राह्युधो गि
नरस्तंरमापतिंसनकादयऊचुः॥अयाचितंयच्चान्यत्कोक्षितेचददस्वनः॥२६॥इतिदत्त्वावरंत
स्मैमुनयःकमलापतिः॥स्वामिन्नियंपृथ्वभूमित्वःसिध्यासीप्रगतः॥२७॥किंतुबाधाभ्यमह
राजःस्वाकमलाप्रिया॥निर्बाधंकुर्वतुदेवीसीघ्रंशेषगिरीश्वर॥२८॥यत्काकवेकुंठास्मिन्दिव्य
लोपवर्तोत्तमंत्वयाजुष्यंकदाचीराःकिंतुत्वत्माणिनामिह॥२९॥अहश्यसर्वमृतेभ्यतावत्
किंतेप्रयोजनंदस्तास्यंदित्यवाताःसर्वप्रत्यक्षगोचरः॥३०॥इदमेवहरेस्वामिपरमात्मःप्रयो
जनं॥एवमभ्यर्थितःश्रीशःसनकादितपोधनैः॥३१॥तथेत्यकुर्वयोगींद्राइतिचोक्तामुनींस्तयः॥
प्राब्रवैंद्रंवचोविष्णुःकिंतकर्मवदेतिच॥३२॥इतिपृष्टःपुनःप्राहदेवेंद्रोविष्णुमायया॥स्वामिन्न
च्युतगोविंदरागेणदुरात्मना॥३३॥पीडितोश्ववयंसर्वेस्तास्तास्तंत्यजोमहेदृत्युक्तःप्राह

देवोविदेवेंद्रंकमलापतिं॥३४॥स्वस्थाभवंतदेवाश्यसर्वेचविगतज्वराः॥हत्यत्वदुरात्मासोरावणो
लोककंटकः॥३५॥अचिरांतंवधिष्यामसत्यमेवावधार्यतां॥इत्युक्काकमलानाथःमारुरागंश्यु
चिस्मितः॥३६॥क्रियागमनकालेतेवदस्वंकरसत्वरं॥इतिपृष्टःशिवःप्राहस्वामिन्नियच्युतंवचः॥
॥३७॥स्वामिंस्त्वयासदाकुरक्षियतेव्यंकटेश्वर॥तस्मैवदेवस्तातव्यंमयागंतव्यंतिश्वरं॥३८॥
इतिपृष्टःपुनःप्राहनीलमेघसमद्युतिः॥अकस्मंचवसामीदव्यंकटाद्रयभूधरे॥३९॥त्वमप्य
समुद्रामीशेमहादेववरप्रभो॥उत्पत्यकायामस्याद्रेरोचिष्केशान्तिरीश्वरः॥४०॥इत्याधाप्यनृपः
प्राहकोरात्माजीयमीश्वरः॥स्वामिन्नुपद्रवाद्दुस्त्वत्प्रसादान्मयाच्युत॥४१॥राज्यंभुक्तंचिरं
दत्तंआसणेप्योमलद्रुतं॥अनुभूतःसुखंसर्वंजितोश्वरिपवस्तथा॥४२॥नानुभूतंसुखंपुत्रज
न्मसंभवमच्युत॥नत्लोकेपुत्रहीनस्यगतिर्दृष्टिर्द्विजन्मनः॥४३॥देहिमेपुत्रमोजिष्ठंत्लोकविख्या
तपौरुषं॥इतिप्रोक्तःपुनःप्राहराजानंव्यंकटाधिपः॥४४॥राजंस्त्वयाकृतंपूर्वंदुःसहंकर्मचाद्भुतं॥

किंकर्तव्यं मयाराजन्नरकस्कः प्राहतंनृपः॥४५॥स्वामिन्नभ्युदितेसूर्येतमस्किष्टेकथंप्रभो॥क्षीयंतेचास्यकर्माणितस्मिन्दृष्टेपरावरे॥४६॥इतिवाक्यंश्रुतिःस्वामिन्त्वयिदृष्टेकथंमम॥इत्यस्कोममगोविंदकथंपापंत्वयिस्थिते॥४७॥प्राहतंनृपेणोक्तःश्रीशःपापविनाशनः॥राजन्प्रीतोस्मिगच्छेत्थंचतुःश्लोक्यात्वदीयया॥४८॥स्तुत्यात्वपरमप्रीतःस्तादास्येनवरोत्तमं॥यस्मात्प्रोक्तंचतुःश्लोकीतेनश्लोकाममप्रभोः॥४९॥तस्मात्सुतैस्तुतैश्चैव-यथारोमतविक्रमः॥श्रद्धयाश्रवणंतस्यश्रयमतुलंव्यवसविक्रमः॥५०॥जित्वयागोध्यांगत्वादृष्ट्वयमादरात्॥इत्युक्त्वोथराजेंद्रोबभूवपुलकांचितः॥५१॥स्तुत्वास्तवातुबहुधादेवदेवंरमापतिं॥प्रदक्षिणांततःकृत्वापुनःस्तुत्वाप्रणम्यच॥५२॥आमंत्र्यरोषरौद्रेंद्रनिलयंस्वपुरोहितः॥ययौदशरथःश्रीमान्गोध्यांसहबंधुभिः॥५३॥ ॥इतिश्रीवाराहपुराणेश्लेव्येंकटगिरिस्थदशोध्यायः॥ ॥१७५॥श्रीरस्तु

सलज्यावच॥इतिदत्वावरंतस्मैनृपायकमलापतिः॥कमलासनमाभाष्यइदंवचनमब्रवीत्॥१॥
अतिकालस्त्वतिक्रांतःकिमर्थंस्तूयतेत्वया॥किमाभिष्टंवरंदद्मिप्रब्रूयंदास्यामितेवरं॥२॥
इतिपृष्टःपुनःप्राहश्लोकविलासकः॥यदिस्यादास्यतिविश्वेशममाभिष्टंरमापते॥३॥
यभूतस्त्वमवाच्यश्चसर्वप्रत्यक्षगोचरः॥केवलंदर्शनादेवसर्वेषांसर्वदःसदा॥४॥स्तुत्यस्तव्यंभवा
वताश्लोकानुग्रहकाम्यया॥किमभिष्टंजनाःसर्वेत्रिश्रोदरपरायणाः॥५॥नजानंतिनराधर्मंधर्मंचाविमानवाः॥प्रायशोदुर्बलाःसर्वेरोगिणःकाममोहिताः॥६॥पशुप्रायामनुष्याहिनजानंतंमनोहितं॥प्रायशोवापिनामेयुर्नजन्मकलौहरे॥७॥क्षुत्तृष्णापरितापार्तासर्वेनित्याजानंकिंचन॥तेयद्युवेक्षितासर्वेनरकारोरवादयः॥८॥तर्पयापुनःसृज्यानरकालोकरूपधा॥भवेयुर्व्यंकयधीशःदयालोकहृदांबुजः॥९॥तेषामनुग्रहार्थायस्तोत्रंव्याजाद्धरेः॥

अत्रणाम्यर्थितस्त्वंवै कृपानिधिरुवाचतं॥७॥अत्रनम्यर्थितंत्वैतद्देवमनुत्तमं॥सर्वदेवद
यालुत्वंअतोत्रवरंलभ॥अनेनतवतेनाहंप्रीतोदास्याम्यवेप्सितं॥स्नाप्याम्यत्रैवसर्वेषां
मत्यर्दृणांसर्वकामदः॥१२॥आकल्पमिहयस्यामिश्रियासार्द्धंचतुर्मुख॥शेषेणगरुडेनैवविं
प्केनसर्वदा॥१३॥भूम्यांकमलयासार्द्धंससर्वैःपार्षदैःसह॥एकेचिदत्रकुर्वंतितपोनि
यमसंयुताः॥१४॥तेपांसिध्यंतिश्रीअंगसुतमेनहि॥तथैवयत्रकर्माणियोगाश्चावि
चयोगिनां॥१५॥स्यात्पुष्करणीचेयंअत्रलोकपितामह॥तीर्थानांस्यामितत्यातुउच्यते
न्वर्थनामतः॥१६॥यानिकानिचतीर्थानिगंगादीनिमहीतले॥उत्पन्नानिचसर्वाणितीर्थदत्ता
त्पितामहः॥१७॥जलक्रीडांतडागस्यकुर्वंतेयेत्रमानवाः॥तेषांस्यात्पुष्करंपुण्यं ॥३२॥
णितिच॥१८॥उपस्नानेनतेषांतुमहापातककोटयः॥उपपातकसंघाश्चक्षरंतिसकलाश्चया
राक॰॥१९॥

कलानियानिपापानिनश्यंतेवनसंश्रयः॥येयंकामयतेदृष्ट्वास्नात्वास्मिंश्चैसरोवरे॥२०॥तंतंक
ममयाज्ञोतिनाशंकार्यविचारणा॥कामःक्रोधश्चलोभश्चकुलोमृत्योर्वपिरेवच॥२१॥अनपत्योदरि
द्रोवाकुष्ठीव्याधितएवच॥मत्तिश्चानुतापोभक्तिंकृत्वामद्दर्शनोत्सुकाः॥२२॥अयोनितेयथा
कामंप्राप्नुवंतिनसंशयः॥अथप्रभृतिनिःशंकाजनाःकमलसंभव॥२३॥विचरंतुदिशाश्चैव
र्यथाश्चमहीतले॥सुदर्शनमहाज्वालाकल्पांतार्कातिभीषण॥२४॥आगच्छंतंमहाभागश्रृणुम
द्वचनंहरेः॥कुमुदादिगणैःसार्द्धंसर्वायुधपरिच्छदैः॥२५॥ततोनिर्गत्यसहसाःयतोदैत्यमहाबलाः॥
यक्षराक्षसनागाश्चयुष्टाब्राह्मणहिंसकः॥२६॥येचोरायसुहृत्तीरेदेशोपद्रवकारकाः॥तत्रय
गिरौवाविदेशेवाकाननेथवा॥२७॥वारितोस्यगिरेस्तोतुगत्वादुष्टमहाबलान्॥निःशेषा
न्समासाद्यकृत्वादेशंनिरुपद्रवं॥२८॥कृत्वापियत्रलभाविजनरक्षेविधायच॥आगच्छंतंमहा
भागत्युश्चक्रराडवि॥२९॥विनिर्गत्यगिरेस्तस्मादैत्यसेनासुदुर्जयान्॥अन्यानविजनासुष्टा

न्देशबाधाविधायकान्॥३७॥क्षणेनसर्वान्दुष्टौघान्निःशेषंभस्मसात्करः॥कृत्यागच्छमुनेऽचक्षसर्वेषांपश्यतोहरेः॥३८॥सन्निधौतत्समागत्यबभाषेहरिसन्निधौ॥नित्वादैत्यदुष्टौघौप्रताप्राच्यक्षिणस्तथा॥३९॥इतिलक्ष्मिसमाख्यातेचक्रराजेहरिःस्वयं॥पुनरादरसंयुक्तंकार्ष्णिंकिंपुनःसभो॥४०॥वदेतिपृष्टःप्राहासौप्रहर्षसमाकुलः॥विभेमिवेनुदेवेशप्रसन्नमुखपंकजः॥४१॥इत्युक्तोथहरिःप्राहमाभैषीस्त्वंवदस्यतात्॥गत्वाश्वस्तःपुनःप्राहश्रीसाश्रसविदांवरः॥४२॥ध्वजारोहणपर्वश्वकार्यंसर्वमहोत्सवः॥सत्वत्वयामहादेवऔत्तानकार्यंश्रियासह॥४३॥इतिश्रुत्वाविधिस्तोत्रोदितःक्रियतामितिदाविधिश्चकारमुनिभिर्वेस्यानसमुत्सवःसह॥४४॥उत्सवंध्वजपूर्वंचप्राप्तिकन्यागतेरवौ॥अहूताश्चसुराःसर्वेसर्वाभ्योदिव्यतत्क्षय॥४५॥आगतास्त्रिदशाःसर्वेराजानःपुण्यकारणाः॥श्रोत्रणाःक्षत्रियावैश्याःशूद्राश्चान्येजनास्तथा॥४६॥नानाजातिसमुत्पन्नासमुद्रक्षयवासिनः॥अंगबंगकलिंगेषुगौडकाश्चिरविंध्यजाः॥४७॥

चौलमालवपांड्येषुकोशलेषुकुरोद्भवाः॥वसंतश्चजनाःसर्वेसकुटुंबाःसमाययुः॥४८॥कोंकणामप्यहरयोसौदयुर्यात्रार्थंजंतुजाःसर्वेप्रत्यक्षंसुलभःश्रीनिवासःपरात्परः॥४९॥अंगीकारोतिथिर्यानिमित्तंचमहोत्सवैः॥उत्सवेदर्शनंपुण्यंश्रीनिवासस्यसार्ङ्गिणः॥५०॥इतिश्रुत्वंतरासर्वेमुष्यमाणेजनासदा॥चक्रुश्चउत्सवान्सर्वान्विविधानद्भुतानिच॥५१॥पांडुकाश्चजनाःसर्वेदंडैःसर्वेरथादिभिःनृत्यंतोवादयंतश्चगायंतश्चपरस्परं॥५२॥आजग्मुःसेवकाःसर्वेयेकटाद्रयमूधरंप्रतिचकारायासतत्रानसदनानिच॥५३॥अभ्यागतोत्सवंचक्रुःसर्वेयत्रबहुविधास्तथा॥उपकार्यंश्चबहुधाकारितंदक्षलक्षणैः॥५४॥गिरेःपरितस्तत्रनगराणिचकारह॥विश्वकर्माणिविविधानूमनोरमाणिपुराणिच॥५५॥पुरेपुरेषुविविधाःपीथयःपुण्यपीथयः॥शोभंतेगणिकाश्चात्रयोद्विजापुण्यकारिणः॥५६॥तेभ्यश्चान्यश्चशोभंतेमुक्ताविद्रुमराशयः॥यत्रयत्रानिदद्युःसर्वेपानीयान्नंचसर्वदा॥५७॥सर्वेचधर्मनिरताःसर्वेचधनिनस्तथा॥

चक्रनेयो

सेवार्थमागतानांच ददुर्वासोस्यनेकशः ॥५१॥ अलाचदेवदेवस्यचुकारपरमोत्सवं जगुः किन्नर
॥२४॥ गंधर्वानन्नृतुश्चाप्सरोगणाः ॥५२॥ भेरिमृदंगमकुजणधानकगोमुखाः ॥ ढक्काणिसाणयश्च
विवाद्यभेदाअनेकधा ॥५३॥ वादयामासुदेवाश्चनादयंतोदिशोदशा ॥ विमानेपूरितस्तत्रभ
थमोत्तिसर्वतः ॥५४॥ विश्वकर्मनिर्ममेसाम्प्रथंतत्रैवकृतवान्हरः ॥ तुंगप्रासादसंबाधंविचि
त्रगृहवेदिकं ॥५५॥ स्वर्णकांतशिलोपेतंसूर्यकांतसमन्वितं ॥ अनेकरत्नखचितंतत्प्रासादंनि
र्मितं ॥५६॥ तुंगध्वजसमोपेतंरत्नतोरणसंयुतं ॥ जलस्फटिकपुष्पकीर्णदिव्यधूपसुधूपितं ॥५७॥
चकारनगरंतत्रगंधर्वनगरंयथा ॥५८॥ ॥इतिश्रीबाराहपुराणेश्वेतकांडेव्यंकटगिरिमहा
त्म्येऽष्टादशोध्यायः ॥१८॥ ॥सूतउवाच ॥ अलाचव्यंकटेशस्यदिव्योत्सवदिनेषुच ॥नैवे ॥२४॥
द्यंबहुधाचक्रेघृतसूपगुडोत्करं ॥१॥ गुडान्नंपायसान्नंचमुद्गान्नंचतिलोदनं ॥शाल्यन्नंक्षीरसान्नंच
मरिच्यान्नंतथैवच ॥२॥ माषान्नंगोधूमान्नंचमसूरान्नंघृतोत्करं ॥ एवंहिविधिधान्नंचसूपंचाविविधंबहुधा ॥३॥

व्यंजनानिविविधानिकरानिविविधानिच ॥ दिव्यामृतस्यकस्यापिस्वादुरसवंतिच ॥४॥
उद्दौअवसमश्वंचगजमेरावतंतथा ॥ अनंतंनागराजानंगरुडंपक्षधीश्वरं ॥५॥ एकैकंसमधीष्ठाय
व्यंकटाद्रिशिरोमणिः ॥ दिनेदिनेसुरान्सर्वान्वरैर्थैःसमागतान् ॥६॥ अनुगृह्णातिरथ्यायांनंद
मूर्त्याश्रियासह ॥ समस्तवाद्यघोषैश्चगजाश्वैःसमलंकृतं ॥७॥ चित्रध्वजपताकैश्चविश्रचामर
चारुभिः ॥ सहितोनृत्यवादित्रैर्वरनारीगणैःसह ॥८॥ कविभिर्बंदिभिश्चैवगायकैःपाठकैस्तथा ॥ वि
द्यंवेदैस्तुषमानः श्रीनिवासःपरात्परः ॥९॥ प्रातर्देवगणैःकोविदुपहारैश्चपूजितः ॥ तथैवसायंदे
वैश्चपूजितोविधयाहरिः ॥१०॥ एवंतेलोकहृद्यर्थंउत्सवोऽलर्मिलः ॥ कुर्वंत्यागत्यलायांतु ज
नयोधनकल्मषाः ॥११॥ यिविवत्स्वापयामासपर्णकुंभान्मनोरमान् ॥ दिव्यंविधियुक्तंकुवै
रयानरत्नोधनाः ॥१२॥ श्रीनिवासोत्सवदिनपुण्येपापविनाशने ॥ इत्यागतासमाःसर्व्यैःकृ
तंदानान्यनेकशः ॥१३॥ अन्नदानंस्वर्णदानं अश्वदानंतथैवच ॥ गोदानंमहत्पुण्यमिति मत्वा

महाजनाः॥१४॥ शक्तिकादासमिश्रैश्च गृहानिर्मायसुंदरान् शालुंप्रत्येकमतुलंसोपस्कारमलंकृ
तं॥१५॥ स्थापयामासविप्रेंद्रान्राजानस्तंभभूधरे॥ देशानन्यांश्यमनुजान्प्रसाद्यलोकविश्रुत॥
॥१६॥ लग्नेशगाससःकर्तव्यस्तोषदंतिविपश्चितः॥ वासंचक्रुःश्वशुरेणैवविप्रायामानयास्तथा॥१७॥
एवंश्रीव्यंकटेशस्यवर्तमानेमहोत्सवे॥ कदाचित्स्यंदनेदिव्यंनानारत्नविभूषितं॥१८॥तत्रजां
बूनदमयसुचलंध्वजशोभितं॥ नानाकुसुमदामैश्चमुक्ताहारैश्चशोभितं॥१९॥ पद्मरत्नविताना
स्यंसिद्धगंधर्वसेवितं॥ विमानपुष्पकंकांत्यासारयंतंमनोहरं॥२०॥ रथंतंसमधिष्ठायश्री
भूमिसहितःपरः॥ श्रीनिवासस्स्फुरद्रत्नकिरीटमुकुटोज्वलः॥२१॥ अन्यादिदेवदेवेश्यसेव्य
मानस्तपोधनैः॥ परिक्रम्यमहावीथीं राजवीथिंश्रियोज्वलं॥२२॥ पुनरागत्यतंदेवंविमानं
रत्नशोभितं॥ आस्थानंमंडपेतस्मान्मणिस्तंभशतैर्युतं॥२३॥ हिरण्मयमधिष्ठायस्वयंभूक्ष्म

कमलासनं॥ आहूयवाक्श्रीविष्णुरब्रवीन्मधुरंगिरं॥२४॥ श्रीभगवानुवाच॥ अलंमतोस्मि
तितरांवत्सलेनोत्सवेनच॥ शृणुध्वंमुनयोदेवाराजानोयोगिनश्चये॥२५॥ सर्वेसर्वेतुमासे
स्मिन्कन्यारशिगतेरवौ॥ केचित्तत्रप्रकुर्वंतिप्रत्यहंकुतोत्सवंमम॥२६॥तेषांतिष्ठतिवैकुंठ
भूमौकामौनमाप्यच॥ एतत्सर्वंमुहृद्यत्सवधिर्यस्यकथा सतः॥२७॥ क्रमतेपदमेकंचगंतुरोष
गिरिंप्रति॥ पदेपदेश्वमेधस्यतस्यैकस्यफलंतत्रभेत्॥२८॥ ऐहिकस्यफलंतस्यअमोघंफलं
तत्रभेत्॥ सेवंतेतन्महीपात्रेयेहिमामस्मिन्नुत्सवेअत्रकल्पिते॥२९॥ सेवंतेतन्महीपात्रास्येनादद्यु
श्चयोजितं॥ अपामुत्सवकालेतुयेचक्रुःपुण्यदेहिनां॥३०॥ मचिंतितानुसमुद्दिश्यशालंगंय
तत्क्षणात्॥ अन्नेदानंप्रयछंतिलेभांत्यकुलावधि॥३१॥ अन्नंबहुविधंचेंद्रियतेनुमया
धिये॥ तेनुमुक्ताबकुरभोगान्प्रयादरानभोक्ष्यितान्॥३२॥ अंतेहिमत्पदंयांतिस्वर्गंभुक्त्वा

तुमध्यतः॥कार्णोऽपेगुप्तकानांतथैवविकलांगिनां॥३२॥अन्यवस्त्रहिरण्यादिदातृणांसंप
दःसदा॥अनायासेनसिध्यंतिमत्संगात्पन्नगेश्वर॥३४॥रहित्वात्रस्थितैर्नित्यंयोजतिमनु
ष्यभुविमत्तोषाप्तिहेयदास्यामिसंपत्तिंसंततिंध्रुवं॥३५॥तारतम्यवशाद्भक्तैस्तेषामाविर्भ
वेत्पदः॥जननंमरणंयावित्स्थितिर्यावन्मिन्नधरे॥३६॥तेषांमुक्तिःकरस्थाहिलोनसाध्या
सिद्धुर्लभा॥यानिकानिचपापानिसंतिरात्रौदिवानिच॥३७॥तानिसर्वाणिदानानिक्रिय
मानानिचेदृशंतोहिकंतुफलंलभ्यास्वर्गमोक्षितत्रैवच॥३८॥मत्पदंचसारात्सारंतदहुःसत्य
नसंशयः॥गिरेश्चपतितोभूमौग्रामान्नायतनानिच॥३९॥करोतिश्रद्धयाराजाग्रामणो
योविकोविच॥सेवराज्यश्रियंभुक्त्वाभुक्त्वास्वर्गादिकांश्चिरं॥४०॥मत्सायुज्यंव्रजत्येव
नात्रकार्याविचारणा॥पुण्यक्षेत्रमिदंभूमौस्थानंत्यंचसदाप्रवैः॥४१॥तिबुध्यात्रव



सतांगरुक्षेत्रादिकंतुये॥ददतिहनयाज्येऽतिलक्ष्यायासकृतानिच॥४२॥भाक्षुयंतिपुरश्चै
वमत्पदंतुतथाध्रुवं॥अत्रैवयेतांप्राणाविषादानमनुत्तमं॥४३॥कुर्यंतिलोपोविदुषांकी
र्तिस्त्रैलोक्यगामिनी॥तद्वंशबंधुतद्वंशजातद्वंशजनआंधयाः॥४४॥सर्वेपितस्कृतंत
स्यास्मोदंतोदिविदेवयत्॥ ॥इतिश्रीवाराहपुराणेशेषनारदसंवादेव्यंकटाद्रिमाहात्म्येदाक्षो
पिंशोध्यायः॥९२॥सूतउवाचएतत्कालेवेंकटेशः पुरश्चैकंजगादह॥श्रीभगव
नुवाच॥श्रृणुतांविबुधाएतंमयाकिंचिद्ब्रवीमितेऽधुना॥एहित्वाभद्रकुर्वंतिहंदावनमनुत्तमं॥
उद्यानानिचेपुण्यानिनवरंध्रकृतानिच॥२॥पुष्पाद्यानानिरम्यैवलतापुष्पैरर्चयंतिमां॥
दत्तस्यैकस्यदिव्यानिवासराण्यर्बुदानिच॥३॥सर्वेसुत्कायाःप्रयोगास्तातोयांतिचम
हत्॥नांतरायकृतंतस्यास्तसिद्धिमलिलंते॥४॥नत्वयंतातिविच्छेदस्तेषांपुण्यकृतांभुवि॥

फलपत्राणिपुष्पाणिये यच्छंतिप्रतिवत्सरं ॥५॥ उद्धरेत्तथाकामास्तेषामपिमहीतले ॥ प्रत्यहंसम
नैवेद्यंयावत्प्रस्थंचतुष्टयं ॥६॥ सप्तकल्पशतंकल्पयंतीस्वर्गेपुण्यलभाभुवि ॥ अतेऽतलोकमासुरो-मा
लिदास्तेऽर्चिताःनरैः ॥७॥ तदीयदर्शनात्तुष्टोभवेत्यत्रप्रदायिनः ॥ तेषामैश्वर्यसंपत्तौयत्नंकुर्यान्नवा
श्रिष्यते ॥८॥ अंतेयातिपरंधामपुनरावृत्तिवर्जितं ॥ भूषणंस्वर्णरचितंरत्नमाणिक्यभूषितं ॥९॥
प्रयच्छंति-चपुष्पाम्रेमोदयिष्येमहीतले ॥ रूपलावण्यसंपन्नाविद्यावंतः श्रियांसुखाः ॥१०॥ भवं
तिपुत्रास्तेषां-चमत्तदात्संपदोविच ॥ पयःकर्त्तारतुष्ठश्रीचंपकैर्दीपकारिणः ॥११॥ मदर्चनानि
मित्तंहिप्रत्यक्षंश्रद्धयान्विताः ॥ लक्ष्म्यासमेतास्तेषांवैगृहेतस्याप्यहंसुराः ॥१२॥ तेषामधिच
रलाभंकुर्यात्तेश्रद्धयान्विताः ॥ तेषामविरलादास्यंपरमदोत्कमतायनः ॥१३॥ सुरसुरायोगि ११३७
नः-सर्वेयंयंचाश्रमागताः ॥ युष्माकंयशमीष्टंलदास्येहंसकृत्परं ॥१४॥ पुत्रान्पौत्रान्

प्रियंचापिराज्यमारोग्यमेवच ॥ आयुःकीर्तिश्चयश्चान्यन्नतोयांछतियत्पुनः ॥१५॥ कुर्वंतिचा
तुकूलंचतेमेप्रियतरामलाः ॥ निवासंप्रोज्झमनुजाहुपतिविबुधाश्चयेन ॥१६॥ असुरारक्षसा
यक्षाविघ्नाःपापाविनोपिवा ॥ तानहंनाशयिष्यामिसपुत्रंपशुबांधवान् ॥१७॥ यियत्तो
नियतोवापिव्यंकटाद्रिमिमंप्रति ॥ व्याजादपिसमारुह्यस्तोत्रास्यामिसरोरुहं ॥१८॥ नमस्ते
तिवमोवासोरमकामः सर्वदासुराः ॥ कुलक्ष्मीचमलोदोर्वेगुणक्षीरपयोनिधि ॥१९॥ तिश्री
व्यंकटाधीशस्तोष्यतेवरबुद्धः ॥ तैरिमंगपणंत्वेगतस्वनसंयुतः ॥२०॥ पुष्पवृष्ट्या
युतःश्रीमान्श्रीभूमिसहितःसदा ॥ विवेशांतर्महादिव्यंविमानंरत्नतोरणं ॥२१॥ अमरा
दयोदेवगणाःसंभूयप्रीतिमानसाः ॥ जयंतिवास्तुवंतेवघोषेणापूरितंजगत् ॥ २२॥ अ
स्माविव्यंकटाधीशंदिव्यमंगलशोभितं ॥ ऋषिभिःसहधर्मात्मायथोक्तास्त्रमकारयत् ॥२३॥

लक्ष्मीवर्जनदर्शनभेदवदेवस्यशार्ङ्गिणः॥चक्रावभृथंपुण्यंपापिभिर्पापनाशनं॥२४॥स्यामिपु
ष्करणीपुण्येसप्तिलोकप्रजिलेन॥सस्नुर्ब्रह्मादिदेवाश्चमुनयोयोगिनोविधाः२५॥राजानश्च
श्चतथाविप्राःसर्वेवनरास्तथा॥लक्ष्मेस्त्यात्यायोगींद्रःसनकस्सर्वतानवित्॥२६॥सर्वेषांपुरा
तश्चैवमुदाश्चवचनंतदा॥सर्वेशृण्वंतुमद्वाक्यंमुख्यत्यभुजमुच्यते॥२७॥तानंचध्यानयोगो
नसम्यक्कुरुतश्चिरंश्चांतितंसमस्ततीर्थभूतस्य देवदेवस्यचक्रिणः॥२८॥यस्मात्यवभृथे
पुण्येतस्यतत्पूर्वजन्मसु॥अनंतेभुक्तिंपापंतत्क्षणादेवनस्यति॥२९॥इतिश्रुत्वामहादेवस्त
थेयेतिचाब्रवीत्॥एवमेवेतिभगवान्विष्णुरप्यब्रवीत्तदा॥३०॥प्रसादात्सुलभादेवाःस्या
मिपुष्करणीतदा॥विधिवेश्चनरैश्चैवसादरैर्भक्तिभिः॥३१॥उपचारैरनेकैश्चवे
दघोषैःसुरवश्चवैः॥नृत्यगीतादिवादित्रैर्ध्वजमंगलनिःस्वनैः॥३२॥दृष्ट्वाप्रभृत्यानंत्यतो

षयित्वाजनार्दनः॥प्रणाममकरोद्ब्रह्मासर्वदेवैःसमन्वितः॥३३॥ततःप्रीतोभवद्विष्णुर्ब्रह्मकमले
क्षणेनसः॥उवाचचततोविष्णुर्ब्रह्मन्प्रीतोस्मिसांप्रतं॥३४॥एतत्प्रीतिमयाख्यंदातुंतेवन
विप्रके॥ब्रह्मन्वदार्थकंदस्येजगत्सृष्टिपरंविधे॥३५॥यमेवहितावद्धियद्यदस्तिवदस्वतत्
इतिपृष्टोवदन्ब्रह्मान्यथाप्तिंतेहृषा॥३६॥हृताधोस्मिवरंनान्यंलोकस्यात्तुगुरुंविना॥एव
मेवहरेस्वामिन्दर्शनाप्तिमर्थितं॥३७॥स्वातव्यंभवताविष्णोलोकानुग्रहकाम्यया॥द
मेवमयाप्तिष्टंयाचनीयंपुनःपुनः॥३८॥इतिपृष्टस्तथेत्याहतथैवास्त्वितिचाब्रवीत्॥उक्ता
चैवंपुनःप्राहब्रह्मणामितौजसं॥३९॥ब्रह्मस्त्वंसृष्टिकार्येषुनियुक्तःपूर्वमेवहि॥गत्वात्वदी
यलोकंचकुर्यास्सृष्टिंसुखीभव॥४०॥इतोगच्छस्वकंलोकंगायित्र्याधिराज्यंत्वदीयकंविनाकृपा
णेशंभोर्नंलोकंगत्वात्वदीयकं॥४१॥उमयाविहरत्वंमयाप्तःकामोप्तिं॥अगस्त्यमुनिस्त

दुर्वासशिष्यैः सहितोधनंच ॥ ४२ ॥ स्वमाश्रमंप्रविश्येवकुरुकर्मण्यतंद्रितः ॥ योगिनश्चयथायो
ग्यंगत्वाऽऽश्रममुत्तमं ॥ ४३ ॥ ध्यानामृतसुतृप्तैश्चस्तोतव्यंयोगिभिश्चिरं ॥ इतिश्रीव्यंकट
शैलमाहात्म्येपूर्वभागेऽष्टाविंशोध्यायः ॥ २८ ॥ ५ ॥ सूतउवाच ॥ अथस्वस्थानंसमुद्दिश्यविसृज्यप्रीतिपूर्वकं ॥ अंतर्धिमा
नंश्रीमृगयासक्तोऽभवद्वेराट् ॥ ४५ ॥ ॥ इतिश्रीवाराहपुराणेऽष्टमेऽशीतिसाहस्र्यांसंहितायां व्यंकटगिरिमाहात्म्ये
विंशोध्यायः ॥ २० ॥ ७ ॥ मुनयऊचुः ॥ भगवन्वेदशास्त्रार्थतत्त्वज्ञानसुनिष्ठितं ॥ श्रुतंकृतम
हाश्चर्यंमहाख्यानमनुत्तमं ॥ १ ॥ व्यंकटाद्रिप्रभावोयंदृष्टःपापनाशनः ॥ तथैवत्प्रीतिरू
पेणनिरूक्तोसिमयावरः ॥ २ ॥ व्यंकटेशस्यमहात्म्यंकिंश्रमःस्वर्गलौकिकं ॥ आश्चर्यमिदमाश्चर्यं
मङ्गलंपरमाद्भुतं ॥ ३ ॥ श्रृण्वतामिदमाख्यानंनास्तितृप्तिःपापनाः ॥ विसृज्यविबुधान्सर्वि
ष्णुःकिंचकारेरमापतिः ॥ ४ ॥ विसृष्टास्तेन देवाश्चकिमकुर्वन्सुचेयद ॥ इतिपृष्टोयदस्माभिः

श्रयतामितिःतूषुनीन्द्राः ॥ ५ ॥ सूतउवाच ॥ आरब्धहंसब्रह्मास्तूयमानसुरैस्तदा ॥ सत्यलो
कंजगामाशुसर्वलोकपितामहः ॥ ६ ॥ दिव्यविमानमास्थायसहस्राक्षःपुरंदरः ॥ गंधर्वै
र्यमाद्यैश्चप्रायैर्देवगणैरावृतः ॥ ७ ॥ नंदिकेश्वरमुख्यैश्चगणैःप्रथमसंस्तितः ॥ सहिपार्थिवनाथो
योपर्वतंव्यंकटाचलं ॥ ८ ॥ कुर्वन्प्रदक्षिणंपश्यन्वरुरुक्षुस्तदाद्रिपः ॥ आग्नेयांदिशिचांजनं
व्यंकटाद्रेःशिवःस्वयं ॥ ९ ॥ तत्रदृष्टोसरःपुण्यंकपिलंलोकपावनं ॥ रमणीयमिदंस्थानंस्वा
म्यपिमयावरः ॥ १० ॥ अतिष्ठत्परमंप्रीतःकामनेषुमहत्सु च ॥ ऋषयःसमरुद्गैवदिशोदश
पूर्वगाः ॥ ११ ॥ तत्रैवोतीर्यतिस्निग्धंजंमरुद्गाचलं ॥ योगिनःसनकाद्याश्चपायसान्नातिलंभृशं ॥ १२ ॥
फाल्गुनीरतिरित्येषास्वाश्रमेनयसंसुखं ॥ फाल्गुनेपूर्णमासेतुतत्तीरेकमलालयः ॥ १३ ॥ अनंत
तीर्थःसिद्धःप्रादुरासीत्पुराकिल ॥ तत्रैवस्नायरंचेदंप्रार्थितंसारमालदा ॥ १४ ॥ ७

ददौ च सरितो नाम फल्गुनी राज्यमुत्तमं ॥ फाल्गुने मासि पौर्णायां फाल्गुनीतीरके वरे ॥ १५ ॥
स्नाप्येत्तत्र मन्वये के चिज्जनास्तेषां भयं सदा ॥ नाहं परान्न स्वजनाज्जीवानां सर्वकामफलप्रदा ॥ १६ ॥
लिदत्तायरेयत्तानघाः श्रीकमुत्तास्वयं ॥ अंतर्धानं गतास्तत्र तत्तीरे मुनयोवसन् ॥ १७ ॥ देवाः के
चन सेव्य विश्रियत्र विदार्य च ॥ उत्तरेवयतेश्रीशात्तत्रतत्रेवतेवयं ॥ १८ ॥ यजंतोत्र्यंकटा
द्रौ श्रीरंगाख्यास्यामहंतिचालया ॥ उत्तरेस्यामितीर्थस्य देवनद्यास्तथोत्तरे ॥ १९ ॥ कृत्वाश्रमपदं
रम्यं तत्रनित्यसतोदिवौकसः ॥ तताउत्तरदिग्भागे सरसः पश्चिमेतटे ॥ २० ॥ जाबालिः स्याश्र
मंतिष्ठेन्मर्त्यसच्चिंतनाश्रमे ॥ कृतिभिः सेवितात्रैव नित्यमीरानमंतिच ॥ २१ ॥ गिरेः पारिस
रेकेचिन्नित्यसन्नित्यमेवहि ॥ पुनरप्यागमिष्यामीतिजाग्रुपरतथा ॥ २२ ॥ आगत्यमगवां
स्तत्रश्रीमत्यंकटनायकं ॥ अर्चयंत्विधिवत्पुष्पैस्तत्रानोद्यानमुत्तमं ॥ २३ ॥ चिरकालं

महाभागः सहशिष्यैर्महामतिः ॥ पिबंत्यानंदपीयूषं निवसत्यंकटाचले ॥ २४ ॥ व्यंकटेशः श्रि
यामूम्यासमेतः पुरुषोत्तमः ॥ कलौतेतद्वापरेषु देवराजैर्महीक्षितिः ॥ २५ ॥ कात्यितैर्विविधै
र्नित्यंउत्तमैः परमाद्भुतैः ॥ पूजितोमोदतेनित्यं दत्तामहंचयाचितं ॥ २६ ॥ कलौयुगेतुहरि
रासोश्रीव्यंकटाचलः ॥ एतद्वः सर्वमाख्यातं कृपिलंमुनयोमलाः ॥ २७ ॥ श्रोतुमिच्छथमद्वो वि
कितद्दृष्वाम्यसंशयः ॥ इत्युक्तामुनयः सर्वेप्राहुरत्तद्दचसादरा ॥ २८ ॥ मुनयऊचुः ॥ व्यंकटे
शाभ्वसुतात्वत्तःश्रुत्वानिहितारणे ॥ दुष्टदानवसंघाश्चदुष्टचोरामहीभृतः ॥ २९ ॥ इत्यकंतु
वयापूर्वंकथंकेचाहतास्तते ॥ श्रोतुमिच्छामिमहतायथस्माद्दयासद ॥ ३० ॥ सूतसूनुक
थामस्यदत्तात्रेणमहर्षिणा ॥ इतिपृष्टोमुनींद्रास्तान्दासौकृतःपरमधार्मिकः ॥ ३१ ॥ सूतउवाच ॥
श्रृणुतांचक्रराजस्य मुनयःपरमाद्भुतः ॥ पराक्रमंसंग्रहेणवक्ष्यामिचनचित्तरं ॥ ३२ ॥

अशक्यंविसराद्दुंचक्रराजान्यवेमये॥दुष्टविनिग्रहेत्यक्तश्चक्रराजोमहाद्युतिः॥३३॥
आलोक्यंकटकाध्यक्षंधारयछिरसदा॥निर्गामिरेलस्माद्धैर्वगणसेवितः॥३४॥
उद्यतायुधशस्त्रैश्चमहामुशलपाणिभिः॥पलातोमरखड्गैश्चशूलपट्टिशधारिभिः॥३५॥
आसिचर्मधरैःशूरैःबाणशार्ङ्गादिसाधनैः॥गजवाजीरथैरुग्रैर्युद्धसंभारसेभमैः॥
॥३६॥भेरिमृदंगपटहैर्टंकानिःस्वणमङ्गलैः॥जयध्वजनसंघैश्चसंयुताश्चपदादिभिः॥३७॥
राजवेषधरःश्रीमान्सूर्यस्तंभुजमंडितः॥किरीटहारमुकुटकेयूरांगदशोभितः॥३८॥देवो
करालवदनोज्वलद्विरसमप्रभाः॥संवर्तकास्त्रसंयुक्तःपंचाशद्वेतपार्षिकः॥३९॥सिर ११४१॥
स्त्रकास्त्रसंयुक्तःपंचाशत्पाशदंडकः॥पद्मरागसमप्रख्यःरत्नवस्त्रादिभूषितः॥४०॥
उग्रमेषेतुरंगास्तादिव्यस्यंदनमास्थितः॥साक्षीदिशंयमोपेतंमहाघोषसमन्वितः॥

सप्त

लसघोषेणमहताजगश्चेचराचरं॥स्फुटितंखाभवत्व्योमदारिताः॥किंतुपर्वताः॥४२॥
इतिश्रीवाराहपुराणेश्रीमत्कांडेव्यंकट
गिरिमहात्म्येकर्मिसोध्यायः॥२१॥ ॥सूतउवाच॥शोषाश्चतस्यपर्वत्यांदिशि
कश्चिन्महागणाः॥संतिसत्ववतोदृष्टादृश्यबोधबलदर्पिताः॥१॥उद्यतायुधनिस्त्रिंशवरचर्मा
पानयः॥मायाविनोमहाघोराचंचकाःप्राणिहिंसकाः॥२॥देवेनविताप्तरणानानाप्राणिभ
यंकराः॥आसाद्यनृपवर्याणांवनदुर्गमाश्रिताः॥३॥बाधंतेब्राह्मणान्नित्यंसाधूंश्चैववि
शेषतः॥गर्जंतोमेघसंकाशानीलांजनसमोपमाः॥४॥नानानानारवस्त्राणिवीराणांनिर्म
लानिच॥सुदर्शनमहाराजसेनायास्तुपुरःसराः॥५॥केचिद्दिव्यास्त्रसामर्थ्यात्सेषांचैव
पुरःसराः॥अभूदभ्रसपर्वतुतुमलंयुद्धमद्भुतं॥६॥युयुधुःसर्वदैत्याश्चरात्रंभारतपार्थकं॥

विधिभ्यश्चक्रराजस्यजलेनींवाहिनींतदा ॥७॥विनिर्दग्धाश्चतेसर्वेदस्युभूतायनेचराः॥त
द्वैराज्यातादृशाश्चशिशुबालस्त्रियोविना॥८॥पयुस्तेविलयंसर्वेघोरमायोपजीविनः॥नि
ष्कंटकमभूत्तंचयनंपदंसिंहमृगाकुलं॥९॥व्येकटाद्दिसमारभ्ययावद्वेलामहोदधेः॥तायद्देशश्च
संग्रामेनपद्दनवनद्रुमाः॥१०॥सर्वबाधाविनिर्मुक्तःसपर्वतनदीतटः॥बभूवपरमस्फीतो
रुमुरुरथोडुराट्॥११॥बभूवुर्मुदिताःसर्वेजनाजानपदाश्चये॥तुष्टपुष्टाश्चविप्राःसर्वेसुनयो
योगिनोविना॥१२॥निवसंतिहियेकेचिन्नास्मिन्देशेहियेजनाः॥तदाप्रभृतिसद्देशोधनधान्यश्च
रासमान्वितः॥१३॥कालेवर्षतिसस्यानिफलंतिबहुधातदा॥बहुक्षीरास्तथागावस्तथास्याद्
दकाहृदाः॥१४॥निरोगाश्चजनाःसर्वेयथाकृतयुगेतथा॥वणिजःऋषिविद्यायांविप्रादेवे
प्रतिष्ठिताः॥१५॥तपस्विनोतपोधर्मेयोगनिष्ठाश्चयोगिनः॥वानिज्येवणिजःसर्वेस्वस्वधर्मेषु

विनिष्ठिताः॥१६॥देवैःसदसमागत्यसुदर्शनहरिप्रियः॥समूहुर्यजनासर्वेनृचक्षत्रंचदमजीवितं॥१७॥
कर्तव्यंभवतांकिंचिदतिचेद्दुष्करंभवेत्॥जनाऊचुः॥इतःपूर्वंयेसर्वेविहितास्मभूरंजनाः॥१८॥
दस्युभिस्तस्करैर्घोरैश्चोरग्रामेश्चराजभिः॥प्रसादाद्वस्त्वस्मिन्देशेवनिरुपद्रवाः॥१९॥अतो
ऽहंयंकृतार्थास्मःस्मरन्कृष्णंचक्रराट्॥धर्मात्मानंनृपंकेचित्कृत्वादेशाधिपंपुनः॥२०॥न्यायेवर्त
न्तिष्वस्वयंचवयंतथाश्रमाः॥एवंसुरक्षितंकृत्वातंदेशंहरिराट्चरः॥२१॥अन्येयांहिशिरो
पाद्यैःकल्किदैत्यानयेमयाः॥महोमायाविनोघोरामंत्रकाःक्षत्रबोधवः॥२२॥बाधंतेप्रजनाम्ये
साधूश्चयवनिविनंतांस्तथा॥देवब्राह्मणविश्वासलोपांताश्चिरकदाचन॥२३॥वनेदुर्गेगिरेदुर्गेस्त
म्बदुर्गेतथैवच॥एषमावासदेवेन्द्रस्यात्तिंहरितमर्थे॥२४॥लेहिनोनामकायेनामागताःसुघना
युधः॥अथयुद्धंमहाघोरंशस्त्रैरस्त्रैःपरस्परं॥२५॥पाशैःखड्गैश्चशूलैश्चशतघ्नीभिस्तथा॥

निश्चेतिस्मतथायोधावश्वानुद्वांश्चाबारणान्॥२६॥तीरासिबुकधायुद्धेचिउदुश्यपदातिनः॥कै
चित्पादेषुसंक्तिन्नाकेचिद्रतिजुरोरले॥२७॥तिरोमिछिन्नपादेश्चकबंधैश्चतथाकरैः॥रास्थै
रश्वैतासुरुष्याणैरुष्ट्राधैश्चतिरोरुहैः॥२८॥रक्तोघैर्मासरुचैश्चकीकसैराहरक्षिभिः॥अरक्षता
युद्धभूमिःसाप्रेतराजस्यबिलृता॥२९॥उपदेशंविभांतिस्मसैन्यंसन्नंयलक्षदा॥सेनैकोदेशं
दृष्टमितंदृष्ट्वादोरात्मसेनया॥३०॥रुद्रोबभूवहेतीनांराजापरमकोपनः॥त्रिपुरारिर्यथाभद्रोदु
राणांसूदनंतथा॥३१॥तांहत्वानांचश्राणांस्वसैन्यक्षा॥मायिनोनिग्रहेतदा॥ज्वालामुखंम
हाध्यक्षंसप्रेत्यसादिदेशह॥३२॥निःशेषंकुरुराजानश्चोराश्चमददुर्मदाः॥रापात्पत्पदा
दालेनचक्रराजेनवैबली॥३३॥ज्वालामुखस्तदाचक्रेयुद्धंपरमदारुणं॥ततःसैन्यंसंकयामास
मदमत्तारिवद्विषः॥३४॥छिन्नाभिन्नासतदाजग्मुश्चोरारक्षभयंकराः॥पाताळंचश्रितास्ते

यंकरास्त्रायुधास्तदा॥३५॥यंकासमरभूमिंवनेत्रीमाश्रयंतुषु॥नहिंगजनाःकश्चिद
हंकोवनभूमिषु॥३६॥गिरौदुर्गेषुसर्वेषुवनदुर्गेषुसानुषु॥मलाचलेषुकुक्षेषुकंदरेषुगुहासु
च॥३७॥मृगयामासुरव्यग्रास्तस्यवानुचरास्तदा॥ददृशुर्नहिकिंचिन्निष्यंतुश्चसरुस्वरः॥
॥३८॥ज्वालामुखायतेसर्वेप्रोचुरेंपदातिभः॥विस्मितःसोपितांमाहोत्मासमरदुर्मदः॥
॥३९॥तहेरावासिनःसाधूनाहूयेदंवचोब्रवीत्॥इदंदेशंसमुद्दिश्यगंतव्यंदेशमन्यतः॥४०॥
क्षणमात्रमितिप्रोक्तंजग्मोदंपरमंधनुः॥ऊर्ध्वंचसंदधेतस्मिन्नाग्नेयंसंभयावहं॥४१॥प्रज्व
ज्वालाचतद्दिव्यंऊर्ध्वंपरमभास्वरं॥ध्मकासुबलदस्त्रंनिष्पेतुश्चसरुस्वराः॥४२॥विंयु
कुंपश्यमृगानिचक्षुरुसागरादा॥ऊर्ध्वंतथैवगगनंगायंश्चोरास्तिष्ठंतिपंचकाः॥४३॥गत्वा
चांभोगभावेभस्मसात्कुरुतानरिं॥ध्मकेपतदिव्यमस्त्रंऊर्ध्वंवोमुसलोगमं॥४४॥आ
कृष्यरोदसीतच्चज्वालामालासमाकुलं॥चोरदेशंसमाकृष्यगिरिदुर्गान्यनाशि॥४५॥७

यश्चयत्रभूषितैतिमाद्यिनस्तोयनेश्वराः॥आदाहतानिसर्वाणिधनान्यन्यानियानिच॥४६॥
तेचसर्वेसुरात्मानोदग्धःकेशःसरोरुहाः॥तेषांस्त्रियाश्चबालाश्चसर्वेदग्धाश्चघस्मिणा॥
॥४७॥बिलेभ्यःकंदरेभ्यश्चनिष्पेतुश्चेक्षणौघवाः॥वनेतदीयेतत्संघेभस्मिभूतंचतत्क्षणात्॥
॥४८॥निर्जनंतत्कुलंसर्वंदग्धमस्माभितेजसा॥अस्मीकृत्यबलात्सर्वंप्रविवेशोषुधिंत
दा॥४९॥दृष्टिमात्रेणयामासमरुःशीतलकारिणं॥अथायमुश्चनेदेशं अजगामुनिगतान
नः॥५०॥निर्दग्धाःसर्वजीवाश्चतेजसातस्यतःप्रभो॥तानिदृष्ट्वातितप्तोनवरायक्षेणसप्र
भुः॥५१॥संतुष्टस्तत्रलेदेशंआगत्यचसुदर्शनः॥तानिदुर्गाणिसर्वाणिस्थानीकृत्यवनानि
॥५२॥प्रकाशानिचसर्वेदेवप्रलभागकं॥तत्रयात्स्थापयामासयक्षरूपिप्रादिकानि ॥४४॥
॥५३॥स्थापयित्वाचतद्देशंधर्मयक्षेदयापरः॥दृष्टिमात्रादिदृष्ट्वाचपोषयामा
सदेविकाः॥५४॥इतिश्रीवाराहपुराणेक्षेत्रकांडेव्यंकटगिरिमाहात्म्येद्वाविंशोध्यायः॥२२॥

सूतउवाच॥सुदर्शनमहाराजाकृत्वादेशमकंटकं॥तस्मादेशमुपाक्रम्यभागंदक्षिणमाययौ
॥१॥आगत्यदक्षिणेदेशेससैन्यःसपरिच्छदः॥नादयामासयाःप्राणिनःसाणकमुरयानिच॥
॥२॥तेनशब्देनमहतादारितायभूधराः॥मदमत्तगजैर्भ्यैःसुंदरैःपर्वतोपमैः॥३॥भूमीकैश्च
यनेतश्चयानिचसहस्रशः॥विविधानिप्रकाशानिरूपाणिनिरयासथा॥४॥नन्यदुर्गाश्चतेस्व
र्वेसुगमाश्चयकृतास्तदा॥तत्रदेत्याश्चसंभूताःशूराःशस्त्रकुशोद्भवाः॥५॥अंगवेगाबुद्धिगश्च
विद्यास्तेचतथाकृतास्तथा॥एतेशस्त्रप्रधानाश्चपंचैतेपंचपाणिनः॥६॥बाधंतेप्राणिनंक्षेत्रे
वितापहारतः॥योगनिष्ठास्तपोनिष्ठायज्ञकर्मसुनिष्ठिताः॥७॥पीडयंतीहमात्राश्चस्त्रि
योदृष्टंश्चनित्यशः॥अग्निहोत्राणिवेदाश्चयज्ञाश्चोत्सवयज्ञाश्च॥८॥आचारावैदिकासर्व
प्रवर्तंतेनकर्हिचित्॥पीड्यमानाःसदाचारैःपंचभिःप्राणिनोभृशं॥९॥शस्त्रास्त्रबलयुक्तः सर्वा
प्राणिपीडाकराअपि॥तेसर्वेसहसाताप्रविचार्यचपुनःपुनः॥१०॥सुदर्शनंचराजानंहत्वा

तत्रसमागते॥सर्वैःसंभूयोद्यम्यैनान्यथागतिरस्तिनः॥११॥राजासुदर्शनोनामसहस्रभुज
मंडितः॥विक्रमेसर्वराजानंतृणेनमन्यतेयुधि॥१२॥यत्रयत्रसवैराजाक्रुद्धःपश्यतिसत्वरं॥
ततःसर्वेचसहसाभस्मीभूतंभविष्यति॥१३॥उक्ताःसर्वेजयेद्वीराःसाधयामोभयंसदा॥
क्षेत्रस्यामिरतिनिश्चित्यलोलुपंभद्रदर्शनः॥१४॥परिधान्यादिशाप्राप्तान्शूलराक्षिपरा
श्वधान्॥चापानिचशराणिवृक्षांश्चविपुलान्शुभान्॥१५॥प्रगृह्यपरमक्रुद्धादार्ढर
दानवस्तोद्यताः॥विविधप्रहरणैःसर्वेविविधाःशस्त्रपाणयः॥१६॥निर्जीतिमदमत्ताश्च
चर्मणैतेमहर्द्धताः॥लोहदंडकुशाताःशूराश्लोमशंकुशपाणयः॥१७॥अन्यत्रदृष्णसंयु
क्तावरचर्मासिपाणयः॥उत्क्रमेवृषभिष्यामिसर्वानिहबलोद्धताः॥१८॥इतिसर्वेसमाज॥ ॥८५॥
ग्मुर्युद्धार्थंसमनोदिताः॥सुदर्शनोविमानेनद्धाकृष्णोनागइवश्वसन्॥१९॥पुत्रैर्गारक्ष्यम॥

१६

त्राध्यक्षैर्जवातोकृष्णसहसटं॥कालांतरणसंत्यंचसंतुष्टमानसात्॥२०॥समेत्यान्ये
रयामासुर्वीराणांनिर्यतेतदा॥निर्यतुस्तेरथैःशीघ्रैर्नागरिकैःसुसंस्कृतैः॥२१॥पारिधा
न्परिघांश्चैवशूलंस्वदृढंपरश्वधान्॥गृहीत्वाविविधंशस्त्रंयुद्धभूमिंव्रजंतिकुडलाः॥२२॥च
क्षुःसुदृष्टजोरेतुबाणान्प्राणहरान्रणे॥लोगदाभिर्विभाभिर्मायैःरवैःपरश्वधैः॥२३॥
अन्योन्यंसमरेजग्मुरस्त्रैःशस्त्रैरनेकशः॥एवंप्रवृत्तेसंग्रामेनिर्द्धतंसमुद्रजः॥२४॥हृष्टानां
देहजातानांशोणितंशोणितविभवैः॥रथमातंगकाश्वेदारोहैध्वजद्रुमाः॥२५॥शरीरि
संजाताःस्वेदाःप्रहारकनिर्गताः॥स्फुलिंगदृष्टोवेगाःध्वजिनोशरीरिमुजघानस्व॥२६॥एके
जघानसमरेज्यातकिशक्तिभैःशरैः॥समासदःसुलिंगश्चजघानसमरेशरैः॥२७॥कालो
त्कोविशात्रंश्चबालुकंरणसायुधिः॥जघानसमरेलीक्ष्णैःशरैरासीविशोपमाः॥२८॥७

ताः सुदर्शनो राजा जयशर्मा सुदारुणं । उवाचार्थानुगतायत्रतिष्ठतिगिरिसानुषु ॥२२॥ प्राणीवा
डाकरायेषु येषु दैत्यांश्च संभवान् । यत्रक्षुभ्यतिक्षेत्रे तिलाभूजलान्तीमहाशरं ॥३०॥ सेथायध
नुषिक्षिप्तेविषसर्पमहाप्रभुः । तदाभूनिर्गमध्वानेधर्म्मसेवेदुरात्मनां ॥३१॥ दैत्यानश्वान्गा
जानुष्ट्रान्रथान्युद्धसमागतान् । द्विधाचकारसमरेजयशर्मामहाकृतिः ॥३२॥ वनेषुतिरो
दुर्गेषुनानेविषमेषुच । यत्रयत्रदुरात्मानोतेसर्वेचद्विधाकृताः ॥३३॥ तज्जीतियाश्चतिर्यावदो
षांदासाश्चबालकाः । द्विधाकृताश्चतेसर्वेविभ्रमस्तेणतेजसा ॥३४॥ तंदृष्ट्वादेवताः सर्वेदे
वाश्चजनार्दनाः । विस्मयंपरमंजग्मुःकिमिदंतेत्यतेजसा ॥३५॥ छिन्नेभिन्नेतनेदग्धेप्रभग्ने
शस्त्रपीडिते । बलेसर्वेतुहृष्टानांदृष्ट्वारणभूमिषु ॥३६॥ देवाघातकदुष्टेषुनकिंचिद्दर्शनेल
दा । स्वस्वदुर्गेचयत्रान्येविधानेदुष्टदेहिनां ॥३७॥ तानसर्वेमहाराजभग्नंमत्वामहागजैः ।
रूपाप्रसादंतंदेवंमत्वाप्रहसमागताः ॥३८॥ महामार्गेचसर्वेभ्यस्त्यक्तकंटकके । विप्रक्षत्रे

आदिकाःसाधवश्चान्यानधिजग्मुश्चहृष्टवत् ॥३९॥ स्वेस्वेधर्मेनियुज्यैवस्थापयामासवैनृपं । नि
रोगाश्चजनाःसर्वेकामक्रोधपराङ्मुखाः ॥४०॥ वेदशास्त्रपराःसर्वेकामक्रोधसर्वेयत्नेषुनि
हिताः ॥ कालेवर्षतिमेघाश्चफलंतीचमहीरुहाः ॥४१॥ समृद्धसर्वसंस्थानिरातंकुःशासना
सदा ॥ अनुग्रहंचतासर्वांनीतितद्देवाधानिधौ ॥४२॥ नुजुंभेव्यंकटाधीशःकरपंकजभानुमान्
तत्रदेवाःसमागत्यसहवादेनसंस्तुवन् ॥४३॥ वर्षुपुष्पवर्षाणिगंधर्वाश्चजगुःकलं ॥ हृदयं
मेत्रवतांस्वस्थाजीवेष्वमुत्तमं ॥४४॥ प्रसादान्निर्भयःसोयंभूतोदेवैस्त्वयाप्रभो ॥ इदानीं
पाश्चिमेभागेफाल्गुनेकार्यंभाविष्यति ॥४५॥ इतिविज्ञापितेसर्वेदिवंजग्मुर्यथागतं ॥४६॥
इतिश्रीवाराहपुराणेश्वेतवराहकल्पेव्यंकटाद्रिमाहात्म्येवृत्रोत्पत्तिर्नामषट्चत्वारिंशोध्यायः ॥४६॥ ७॥
सूतउवाच ॥ राजासुदर्शनःश्रीमान्प्रसादहृतकंटकं देवंस्तुतिमासाद्यसूक्तानिवैधमेक्च ॥१॥

देशस्य रक्षणार्थं च किंचिन्नपवरं तेजोधर्मात्मानं प्रतिस्थाप्य प्रतस्थे पश्चिमं ततः॥२॥ शातं रातस
हस्राणि भेरीणां नि नदुस्तदा॥ पताकिनोरथस्तत्र ध्वजयुक्तश्च वाजिनः॥३॥ मत्तेभाः कल
भाश्चैव तथा गांभीरघोषिनः॥ रात्रवर्मायुधोपेताः रातधा युधकारणात्॥४॥ घंटाश्चैव प
संभृताः वायुवेगास्तथा परे॥ वर्मीस्त्रास्त्रसंभिन्नाः निर्ययुश्च सहस्रशः॥५॥ शताश्वस्त्रिश
तास्ताश्च सहस्राश्वायुतास्तथा॥ सर्वायुधेश्च संपूर्णा पताकाकेतवस्तथा॥६॥ विमानानि च सं
ज्ञानां शतशोथ सहस्रशः॥ स्यंदनानि विचित्राणि निर्ययुर्भास्वराणि च॥७॥ उद्यताविधनिस्त्रिं
शाः शतशोद्यतमत्स्यधाः॥ उद्यतासिगदाशूलास्तथोद्यतकरायुधाः॥८॥ अदृहासान्विमुंचंतो नि
र्ययुश्च पदातिनः॥ मध्येराजराजासौ सहस्रभुजमंडितः॥९॥ निदाघे ग्रतपन्सूर्यः सहस्रा
सुरिवाबभौ॥ गत्वापश्चिमदिग्भागे व्यंकटाद्रेरदूरतः॥१०॥ काननेपर्वताकीर्णे सिंहव्याघ्रसेवि
ते॥ मातंगैर्नदिभिर्मत्तैश्चवराहमहिषैस्तथा॥११॥ ऋषभल्लूकसंयुक्ते तस्मिन्वनमहाकानने॥ ॥४७॥
दृश्यराक्षिदुस्तरः किरातः पर्वतोपमः॥१२॥ नाम्ना काननकर्तीति पुत्रश्च सुतोबलिप

सतंरांभुंसमुद्दिश्यप्रतस्थेयोकरोभवत्॥१३॥ पश्यराक्षससिद्धानां मनुष्यानांमहात्मनां॥ दुर्ल
क्षसमाविष्टसम्मूढस्तानुकश्चन॥१४॥ क्रुध्यंसकरुद्धंध्यात्वाचधतिमान्नरः॥ खड्गमादा
यचिच्छेदस्वशिरःपुष्पसंभृतं॥१५॥ अलंकृतंचगंधाद्यैरर्च्यंतंशिवायतत्॥ प्रसन्नस्तत्क्षणा
द्रुद्रोजिवयित्वातुतंपुनः॥१६॥ ददौचतद्भिप्रेतंलब्धासोवरमुत्तमं॥ वनकर्तीसमाख्यंवनंत
स्मिन्दुरासदं॥१७॥ वनदुर्गपरामर्शंअधिष्ठायमहाबलः॥ अनेकरात्रसाद्यैरनेकैः परिवारितः॥१८
॥ लोकमुत्सादयामासपूरदानपरोद्धतः॥ स्वभुजैः पीडिताः सर्वेविप्राद्याः प्राणिनस्तदा॥१९॥ सतु
तात्वादुरात्मावसुदत्तोमहानृपः॥ रूपरत्येवृतंमत्वाभिजगामरणायसः॥२०॥ एकादशौहिणीसे
नांगृहीत्वासशरासनः॥ सन्नद्धकवचीखड्गीदंशितःपरवीरहा॥२१॥ रथमास्थायसज्जंचसर्वशा
स्त्रास्त्रभूषितं॥ ययौचतस्यपुरतस्त्रिरात्र्यमहागजाः॥२२॥ पदातयस्तंसरथायययुः शस्त्रपा
णयः॥ प्रवर्तितमहायुद्धंसेनयोरुभयोरपि॥२३॥ शस्त्रैरस्त्रैः शितैर्बाणैर्भिंदिपालैः परश्वधैः॥७

कुंततोमरशस्त्रैश्चचक्रैःपट्टिशशोभितैः॥२४॥शक्तितोमरशूलैश्चगजवर्मासिसाधनैः॥अन्यो
न्यंकदनंकदनंचक्रेदेवदानवयोरिव॥२५॥रात्रौपरिघाभिश्चचित्रैरन्यैश्चसाधनैः॥सुदर्श
नाभराश्चापिनिजघ्नुस्तानरिशत्रुजान्॥२६॥विविधायुधहस्ताश्चशूलमुद्गरपाणयः॥गदा
भिर्पट्टिशैर्दंडैरासितैर्मुसलैर्भृशं॥२७॥परिघैर्भिंडिपालैश्चभल्लैःप्रासैःपरश्वधैः॥रथै
कवचिनस्तत्रधैर्ध्वजैश्चसमलंकृतैः॥२८॥हिरण्यजालविहितैरश्वैश्चविचित्रनैः॥हयैःपरम
शिल्पैश्चगजैश्चमदोत्कटैः॥२९॥तोमरासिश्चभीमश्चपट्टिशैःकुंडमुद्गरैः॥घोरैश्चपरि
घैश्चित्रैस्त्रिशूलैःपरिरक्षितैः॥३०॥विदार्यमाणास्तैश्शस्त्रैर्निपेतुर्भुविसंयुगे॥अमर्षा
जनितोद्वर्षश्चक्रुःकार्यण्यमीतवत्॥३१॥शरनिर्भिन्नगात्राश्चशूलनिर्भिन्नदेहिनः॥
ममर्दुर्दुष्टचाराश्चनागानिचयमाशिरः॥३२॥तद्बभूवाकुलंघोरंयुद्धंसैन्यंद्वयद्वयस्यच॥ववर्षु

रुधिरंकेचिकेचिन्मुखैस्तेवनवासिनः॥३३॥पार्श्वेषुदारिताःकेचिकेचिद्वक्षःसुदारिताः॥पट्टिशै
श्चूर्णिताःकेचित्प्रासैःकेचिद्विदारिताः॥३४॥अध्वजैर्निपातितानागैःशरैश्चनिपातिताः॥रथैर्वि
मर्दिताःकेचिद्भादिताःकाननेस्थिताः॥३५॥मुद्गरैराहताःकेचित्पतिताधरणीतले॥परिघै
र्मथिताःकेचिद्भिंदिपालैश्चदारिताः॥३६॥केचिद्विनिहताभूमौरुधिरावनोकसः॥केचिद्वि
त्रासितानष्टाःकेचित्पार्श्वेचराश्रिताः॥३७॥विभिन्नहृदयाःकेचिच्छिन्नैर्हारितापरे॥एवंवि
द्रावितंसैन्यंवनकर्तावितोक्ष्यतां॥३८॥बभूवक्रोधताम्राक्षःसेनाध्यक्षस्तुवाच्चह॥ज्वलत्पादंम
हाशूरंजल्पित्वंगज्ञ्रीप्रतः॥३९॥इत्याकर्ण्यवचस्तस्यगर्जज्जात्यादिप्रतापवान्॥धनुर्विपाट्य
मासरथस्थंकनकांगदः॥४०॥सुदर्शनमहाराजोसेनाध्यक्षंवितोक्ष्यतांबोधवामुत्वना
मानंमहावानरविक्रमं॥४१॥अद्रित्वंसमरेगज्ञ्रसुसैन्यंमशोषतः॥इहंप्रीतःसोधनिर्गत

सरथस्तदा ॥४२॥ रणाई मादाय सुमहत्तस्मिन् बाणान्युयोज प्रमुमोच ततः सैन्येरारसंधान्महा
रथः ॥४३॥ रातंसहस्रमयुतैराराणां वडवानलः ॥ बाणैरनेकैः सहसाजिघांसन्महारथः ॥४४॥
दशाभिरतिवाजिनो राडथानां वाजिनोऽथाग्र्यगजानां च पराभेकांएकेनरातपत्रिणम् ॥४५॥ जघान
चमहातेजाकालांतकयमोपमः ॥ बद्धेषापावकेयद्दंभासिघ्नन्सातिक्षणात् ॥४६॥ ततस्तेन्यंघ
र्षन्भस्मसाद्वडवानलः ॥ एकामक्षौहिणीसेनांसुदर्शनबलोऽणोः ॥४७॥ प्रापयेद्यमतो
कंचमुहूर्तद्वयमात्मनः ॥ निरीक्षंसबलंसर्वंरुद्रमाल्योक्यवेगतः ॥४८॥ दिव्यमस्त्रंचसंधायतिष्ठ
तिष्ठेतिचाब्रवीत् ॥ आजगामरथीरश्मिकिरातोऽतिपराक्रमः ॥४९॥ सुदर्शनमहाकोपेसजा
तावग्निमारुतौ ॥ विष्णुचक्रेणसंघोरंजघानवनगोचरं ॥५०॥ हतेकिरातराजेतुतद्बलंनिर्मलंब ४९
भौ ॥

इतिश्रीवाराहपुराणेक्षेत्रकांडेवेंकटगिरिशिरमहात्म्येचतुर्विंशतितमोऽध्यायः ॥२४॥

सूत उवाच ॥ राजाथकारसहसासुदर्शनपराभिवं ॥ तंदेशंहतदुष्टंवहतापंरुकंटकं ॥१॥ कृत्वा
सर्वाणिदुर्गाणि गिरिरक्षत्वनानिच ॥ विनिरुद्यगजैरश्वैःसर्वदिक्षुमहापथं ॥२॥ संस्कृत्यात्र
मनुजांस्तोषयित्वायथासुखं ॥ तंदेशंरक्षकंकृत्वा विदुर्भिक्षं स्वयंवादिशं ॥३॥ निर्वेरयद्देशमध्ये
चजनानामेभ्यसत्वरं ॥ प्रतस्थेबलसंस्थस्तुदुष्टचोरनिगाषया ॥४॥ ततश्चोत्तरदिग्भागे सहस्र
दिवेरातःपुरंशुभं॥यत्रपद्मालयाकन्यासमास्तेसखिभिर्हृता॥४२॥गत्वापुरीसमीपस्थां
कन्याकामातुरांसुतां॥पुत्रिकेतेकरिष्यामिवरंवाकिंप्रियंशुभे॥४३॥इतिमंत्राभिपृष्टासा
मंदमादमनस्विनी॥नेत्राभिरामयंलोकेसतामविमनप्रियं॥४४॥यद्दृष्टकामाअलाभायतु
सर्वगतेमरुत्पतेजसामापितेजस्वीदेवागमापिदैवतं॥४५॥भक्तैः॰सद्भिरिहाप्यभभक्तैर्नक
टाचन॥तास्मिन्नेवमनोमेवंवरंनारुंप्रकामये॥४६॥तमेवाविष्णुतांयातभक्तानांसर्वकामदं॥

श्रीवराहउवाच॥एतच्छ्रुत्वातुधरणीतोषपृष्टपुनःसुताम्॥४७॥तल्लक्षलक्षणंब्रूहियैःप्राप्यतेसुलो
चने॥पद्मालयउवाच॥भक्तानांलक्षणंमातःशृणुगुह्यसमाहिता४८॥शंखचक्रांकितानित्य
भुजयुग्मेवसुधरे॥ऊर्ध्वपुंड्रंसोत्तरालंतेषांमेधविशोषतः॥४९॥पुंड्राणिद्वादशापुनःधारयंती
तथापरं॥ललाटोदरहृत्कुक्षिजठरंपार्श्वयोरपि॥५०॥कंठादिभुजेद्वंद्वेपृष्ठेपीठरमर्दनं॥
केशवादीनिनामानिद्वादशांगेषुद्वादश॥५१॥जोसुदेवेतिललाटेधारयंतिनमोस्त्विति॥ते
षांतुनियमान्वक्षेमातःशृणुमनोरमान्॥५२॥वेदपारायणरतोःकर्मकुर्वंतिवैदिकं॥सत्यं
वदंतियेधीरानास्तयंतिपरान्क्वचित्॥५३॥परनिंदांनकुर्वंतिपरस्त्रेतूरंतिये॥नस्मरंतिन ७७
परयंतिनस्पृहंतिकदाचन॥५४॥परदारान्सुरूपांश्चयेचत्यक्त्वाविदूरवैष्णवान्॥सर्वभूतद

यावंतःसर्वभूताहितेरताः॥५५॥सदागायंतिदेवेशंतान्भक्तान्वैदिवौ॥येनकेनचसंतुष्टाःस्व
दारनिरताश्चये॥५६॥वीतरागभयक्रोधाःस्तान्भक्तान्विद्धिवैष्णवान्॥एवंविधैर्गुणैर्युक्ताः
पंचायुधधराभुवि॥५७॥विप्रःचाचार्यरूपेणराष्ट्रेनान्येनवैपुनः॥स्वगृहेतुविधानेनव
क्ष्यमादायवैपुनः॥५८॥चक्राद्यायुधमंत्रेणपुटंकृत्वासुशोभनं॥मूलमंत्रेणसंस्कृत्यवीक्ष
णेतःपरं॥५९॥जातवेदसमंत्रेणपश्चादेष्टोरहोतरं॥कृत्वाव्याहृतिभिश्चैवचक्रादिसं
स्कारयेत्॥६०॥सप्तजातसुतस्यापिकरणामंत्रयेद्धारयेद्बुधः॥भुजद्वयेशंखचक्रमूर्ध्वपुंड्रार्ज
वंतथा॥६१॥ललाटेतुगदाधार्यहृदयेरवपंकजं॥एवंधार्यानिपंचैवविष्णुभक्तैर्सुलक्ष
णैः॥६२॥अथवाभुजद्वयेशंखचक्रंचैवसुलक्षणं॥एवंलक्षणयुक्तायेभक्तास्तेवैष्णवा
वास्मृताः॥६३॥तैरेवलभ्यतेब्रह्मसदाचारेतविशेषतः॥तस्मिन्नेवमनोनीतिस्तस्माद्धु

कोक्षतेमनः॥६४॥मातर्विष्णुंविनान्येनुयाताकाचिन्नजायते॥स्मरामिशामलंविष्णुंवदामि
हरम्सुतं॥६५॥तेनैवमातर्हिमाम्बितघोगेचिंयतांधिषिः॥श्रीवराहउवाच॥इत्युक्तामातरं
दीनांधिरामाबुजासनां॥६६॥तत्प्रत्याचिंतयामासविष्णुप्रीतिकरंभवेत्॥एतास्मिन्नंतरेक
न्याआगत्यशीर्षमर्चच॥६७॥आगतांधरणीदृष्टुसद्यवकुलसंभवां॥आगतांस्वागतेनाथ
कामपूजयित्वाशुभेक्षणैः॥६८॥दत्वाथदक्षिणांपूर्णांवस्त्रालंकारसंयुतां॥आशिषोवां
चयित्वोथयोचितार्थंस्थापयिष्यते॥६९॥विसृज्यत्रालिणांसर्वानथपृष्टस्वयोषितः॥
पूजयित्वसमागत्यशीर्षमागतासोमनस्विनी॥७०॥ ॥इतिश्रीवराहपुराणेव्यंकटगिरि
माहात्म्येशेषनारायणविष्णुभक्तलक्षणकथनंनामचतुस्त्रिंशोध्यायः॥३४॥७८॥७

WEMORIAL

धरण्युवाच॥कैषाब्रूतवराकन्यांसुस्वामिसंगतोकुतः॥किमर्थमागताचेहपूज्येषाप्रतिभातिमे॥१॥क
न्यकोउचुः॥एषादिव्यांगनादेवीत्यधिकायोर्थमागता॥देवालयेसंगतेयमस्माभिःशिवसन्निधौ॥२॥
पृष्टावदत्रभवतीद्रष्टुमेवागतेतिवै॥श्रुत्वाद्रष्टुराजगृहेमयारात्रौसुखेनच॥३॥एवंपृष्ट्वास्मतांश्रम
सलास्माभिश्चगम्यतां॥वयंतुधरणीदास्योगमिष्यामोनृपालयं॥४॥इत्युक्तास्माभिरायातात्वे
त्समीपंवसुंधरे॥भवत्याःपृच्छतांनेषाकिमित्यागमनंप्रति॥५॥श्रीवराहउवाच॥अथतासांवचःश्रु
त्वातामपृच्छद्वसुंधरा॥धरण्युवाच॥कुतस्त्वयागतंदेवीकिंवाकार्यंयातव॥६॥ब्रूहिसत्यंकरि
ष्यामित्वदागमनकारणं॥बकुलमालिकाउवाच॥व्यंकराद्रेसमायातानाम्नाबकुलमालिका॥७॥
स्वामिनारायणीस्माकंआसेश्रीव्यंकटाचले॥कदाचिद्दयमानंहंसशुकंमनोजवं॥८॥मृगयार्थे
गतारात्रौव्यंकाद्रिसमीपतः॥वनानिविचरन्कालेगोभनोकुसुमोत्करे॥९॥पश्यन्मृगानाजास्त्रिंशता

वर्यो[ऽ]तिरभानुरूत्॥शुक्रान्याश्रायताङ्गं सान्यत्रिणोन्योयनोत्तरे॥१०॥गजराजंतमकिंचिद्यथावन्मदव
र्षिणं॥करेणासहितंतुंगमतुगज्ञसुरोत्तमः॥११॥वनाद्वनंतरंगत्वारूपंरौरवमुपागमत्॥तपस्यंत
७९ वृहलेतेप्रतिष्ठाप्यजनार्दनं॥१२॥श्रीभूमिसहितंनित्यंअर्चयंतंचमाधिपः॥रोगनागबाधिंनाप्रस
रःपावनमुत्तमं॥१३॥तत्सरस्तीरमासाद्यतुरगादवरुह्यच॥राजवेषसमासाद्यतमपृच्छन्द्विजोत
मं॥१४॥क्रियतेकिंनृपश्रेष्ठपादेस्मिन्रोषभूभृतः॥रौरवउवाच॥अरुहेहयदेशीयःपुत्रश्चैतस्यभू
भृतः॥१५॥प्रह्लादविष्णोःप्रीतयेश्रुत्वानारदितःक्रतून्॥आदरान्नोमहाविष्णोनिर्विण्णोहंनृपात्म ४ना
ज॥१६॥तदानिभगवद्ध्यानाद्यस्यवाणीनाशनी॥राजन्तमभविष्यामिप्रत्यक्षंतेवचःशृणु॥१७॥
गच्छनाडीत्यंतपःकुर्वितमावदत्॥ततोदेशमहत्यक्त्वातपसाराधयाम्यहं॥१८॥अनन्यदैवंनृपार्चियं ७९
प्रतिष्ठाप्यश्रियःपतिं॥अगस्त्यनुग्रहान्नित्यमर्चयामिविधानतः॥१९॥इतितस्यवचःश्रुत्वाब्रह्मा

सेनाद्रुतंविभुः॥गच्छनारायणाद्रिंवैतस्यपादंकिमास्पृते॥२०॥आरुह्योत्तमार्गेणपश्चिमेशिरसो
ऽन्तिकं॥प्रणम्यविष्वक्सेनंतंवालेन्यग्रोधमूलतः॥२१॥स्वामिपुष्करणीगत्वास्नात्वातीरेथपश्चिमे॥
अश्वत्थंतत्रवल्मिकंद्रक्षसेनृपनंदन॥२२॥तयोर्मध्येसमासाद्यतपःकुर्वितमोदयत्॥कश्चिच्चे
तोवरालोस्मिन्वल्मिकेचरतिध्रुवं॥२३॥सुतपुण्यवतामेवदर्शनंयातिभूपते॥श्रीवराहउवाच॥
इत्यादिश्यहयारूढोजगाममृगयांविभुः॥ऐरंवनादनंसुभ्रसमासाद्यनदीं॥अवरुह्यहया
तत्रविचचारतटेशुभे॥२५॥वनात्तदागतावायुःपद्मकल्हारशीतलः॥श्रमापयन्नोमंदंहिपवेपु
रुषोत्तमः॥२६॥तरवःपुष्पाणिविकिरंतःशिषिरे॥एवंसविचरन्पुष्पभारालब्धनृत्॥२७॥
विचित्यराजराजंतपुष्पलाविंदद्रतिः॥कन्यासुयेषारूचिरामेधाविवरातरुदः॥२८॥तोसोमध्ये
गतांतविंदद्रतिंमनोहरां॥लक्ष्मीसमांहेमवर्णांतस्यासक्तमनाभवत्॥२९॥तांकोमलश्रुतांकन्यां

केयमित्येवपूरुषैः॥ उत्कास्ताभिरियंकन्याविषयद्रष्टोमहाबला॥ ३०॥ इदंश्रुत्वानचस्तासोत्थयामासुर्
वेगवान्॥ आजगामाशुभंवात्स्यालयंरुचिरंगिरिं॥ ३१॥ तत्रस्वात्मयामासाधस्यामिपुष्करणीतटे॥
मामाकृत्वावदद्वीभत्सबकुलमालिके॥ ३२॥ विषयराजपुरंगत्वाप्रविश्यांतः पुरंसखी॥ तत्पत्नींध
रणीप्राप्यपृष्ट्वाकुशलमेवच॥ ३३॥ यावत्स्वतनयांतस्यांरुचिरांकमलालयां॥ राज्ञोभिमतामालाय
शीघ्रमागतभामिनी॥ ३४॥ इत्युदेवेनचात्मत्यादेशंतत्कृतमागता॥ यथोचितंकुरुष्वेवंराज्ञामंत्रि
सुतेनच॥ ३५॥ कन्ययाचदिनार्यैवप्रोच्यतामुत्तरंवचः॥ श्रीधरउवाच॥ अथतस्यवचः श्रुत्वा
प्रीतारातीबभूवह॥ ३६॥ उवाचकुपिकारःराजानंउपेत्यकुमलालयं॥ मंत्रिमध्येवदद्वीकंचनंबकु
लोत्पलजः॥ ३७॥ श्रुत्वाप्रीतोभवद्राजामंत्रिणःस्वपुरोहितं॥ राजोवाच॥ कन्यात्वयोनिजादिभ्यो
सुभगाकमलालया॥ ३८॥ अर्थितादेवदेवेनव्यंकटाद्रिनिवासिना॥ पूर्णोमनोरथोमेयश्चतकिंसम

तंस्तुवः॥ ३९॥ श्रुत्वामंत्रिगणाःसर्वेराज्ञोवचनमुत्तमं॥ प्रोचुःसुप्रीतमनसोविषयद्राजंमहामतिं॥ ४०॥
वैयंकटाधिराजेंद्रकुलेसर्वोत्तमेतव॥ भवेत्कन्ययमतुल्याश्रियासंदरमिष्यति॥ ४१॥ दीयतांदेवदे
वायशार्ङ्गिणेपरमात्मने॥ अयंवसंतःश्रीमांश्चश्वशुभंदाप्रविधीयतां॥ ४२॥ आहूयाधिषणंत
मंविवाहार्थंविधीयतां॥ तथास्त्वित्याकृयमासमुरलोकाहुरुत्पतिं॥ ४३॥ अपृच्छत्कन्यावरयोः
विवाहर्क्षंनरेश्वरः॥ राजोवाच॥ कन्यायाजन्मनक्षत्रंमृगशीर्षंचवैस्मृतं॥ ४४॥ देवस्यश्रवणर्क्षं
हितयोर्योगंविचार्यतां॥ श्रुत्वाप्रीतःसधिषणस्तयोरुत्तरफाल्गुनी॥ ४५॥ संमतास्वस्वपक्ष्यर्थंप्रो
च्यतेदैवचिंतकैः॥ तयोरुत्तरफाल्गुन्यांविवाहःक्रियतामिति॥ ४६॥ वैशाखमासेविधिवत्क्रीय
तामितिसोब्रवीत्॥ श्रीधरउवाच॥ राजातुधिषणंतत्रसंपूज्याथविसृज्यच॥ ४७॥ देवस्यदति
कामाहगतदेवालयंशुभं॥ वैशाखंदेवदेवायकल्याणंवदसुव्रते॥ ४८॥ वैवाहिकंविधानंतुकृत्वा

चागम्यतामिति।ततोदेव्याःप्रियकरंशुकंदूतेनयाससु॥४९॥विसृज्यवायुंससुतंराधाकाननेसकरा
ह्वयविश्वकर्मणंपुरात्कारकर्मणि॥५०॥नियोजयामाससोविनिर्ममेदिव्यांतराद्भुतां
८१ जलपुष्पराढिंनरतुश्चयोषितोगणाः॥५१॥धनदोधनधान्याद्यैःपूरयामासवेश्मसु॥यमस्करोगहीना
श्चयचकारमनुजान्भुवि॥५२॥वरुणोरत्नभाजानिमौक्तिकादीन्यपूरयत्॥एवंसंपाद्यसर्वाणि यथु
देवाघशायतं॥५३॥श्रीवराहउवाच॥ततःसलायमास्वश्रुकेनसमायथो॥श्रीर्यंकदाद्रिमा
साद्यदेवालयसमीपतः॥५४॥अथरत्नतुरंगात्स्वाश्रुकेनाभ्यंतरंयथो॥दृष्ट्वादेवंरत्नपीठश्रिया
स्वरसुतोचनं॥५५॥प्रणम्यात्यवदन्मोलरूपंतत्संस्कृतंविभो॥मांगत्यवातांवृतुंयेश्रुकेणसमा
गतः॥५६॥वदेतिदेवेनातःश्रुकेनत्वातमोब्रवीत्॥त्वांप्रत्याहसुलाभ्रमेमोमेगाकुरुमाधव॥ ८१
॥५७॥वदानिनामानिसदास्मरात्मित्वद्गुणःस्तदोप्रियंतेतवचिरंसुजाघंगैरमापते॥५८॥

त्वद्भक्तानर्चयामिरूपेचसंस्कारसंयुता॥त्वत्प्रीतयेहंकर्माणिकरोमिमयुसूदन॥५९॥एवंसदाचरंती
मंविभोरलुमतेमम॥कुरुप्रसाददेवेशमामगीकुरुमाधव॥६०॥श्रीश्रुकउवाच॥रतिविलापणा
मासकमलोद्भवात्मजा॥श्रुकस्यवचनंश्रुत्वासुप्रियंत्वामनोहरं॥६१॥श्रीभगवानुवाच॥कर्तुंक
ल्याणमेभाद्रमासिशुक्लाष्टमीतिथौ॥श्रुकाख्यवदेवतारूपंदेवोब्रवीदिति॥६२॥श्रुकश्रुत्वादेवदे
वंसमादायवनमालिकं॥देवदर्शयथौशीघ्रंविष्णवेराजसुतांप्रति॥६३॥तुलसीमालिकादत्वाभृग
वेसिंहरूपिणे॥प्रणम्यदेवीमवदद्भक्तोदेवयजःशुभं॥६४॥श्रुत्वातन्मालिकांगृह्यमहिजाहार
सादरात्॥कृत्वातंकारसुचितंदेवागमनकांक्षिणी॥६५॥विष्वक्सेनोविसानंदंदृष्ट्वामालांसादरं
अन्नोविधायतांराजंविविधंरत्नसंयुतं॥६६॥विष्वक्सेनेयवोप्यंयत्परमान्नंविधीयतां॥देवानां
चऋषीणांचनराणांमाधिसंमतं॥६७॥चतुर्विधंसुगंधाढ्यंअमृतामेसुधाकरं॥एवंकृत्वासविधा

नं प्रतिष्ठ्यागमनंविभोः॥६८॥सभार्यांमंत्रिसहितःसमासोप्रितिमानसः॥पुत्रीमलंकृतंकृत्वाधा
रणंसहितोनृपः॥६९॥ ॥इतिश्रीवाराहपुराणेव्यंकटगिरिमहात्म्येशेषनारायणसंवादे पद्मावतीकल्या
८२ णंनामपंचत्रिंशतितमोध्यायः॥३५॥ ॥श्रीवराहउवाच॥ ॥ततोदेवाधिदेवोविल
क्षमाहृयभामिनीं॥किंकार्यंवदकल्याणीविवाहार्थंसुलोचने॥१॥आज्ञापयस्वसुश्रोणिसरसंवरम
कार्यंकुलेप्रिये॥श्रीरुक्मकक्षायचःश्रुत्वासरसंवरमाभ्योदयात्॥२॥श्रियालक्ष्मीततःप्रीति
सुगंधंजलमाददौ॥श्रुतिंक्षौमेसमादायतस्थौदेवस्यसन्निधौ॥३॥भूषणानिसमादायस्म
तिरायजोमुदा॥धृतिरादर्शमादायकांतिर्मृगमदंदधौ॥४॥यस्यकर्मसमादायह्रीस्तिष्ठतापुर ८२
तोहरेः॥कीर्तिकनकपट्टंचसरत्नंमुकुटंदधौ॥५॥छत्रंदधौतदंडाणीचामरंतुसरस्वती॥

द्वितीयंचामरंगौरीव्यंजनंविजयाजयौ॥६॥आगतास्तासमालोक्यश्रीरुक्मायससत्वरा॥सुगं
धैतैलमादायदेवमभ्यज्यहर्षिताः॥७॥उद्धृत्यगंधचूर्णेनदेहांगंपरिमृज्यच॥अभीतानकविभिन्नो
यकलशान्काञ्चनाछतैः॥८॥घृतंदुग्धादितीर्थेभ्यःकर्पूरादिसुवासितान्॥एकमेकंसमादायस्ना
प्यषिंचन्प्रमुदान्वितः॥९॥धृष्यकेशान्सुधूपेनशुष्कान्कृत्वाबबंधच॥सुगंधेनातुलितांगेस्वर्णव
र्णनिभद्विभो॥१०॥पीतकौशेयकंबध्वाकट्याकांचीसमन्विता॥मुकुटादिविभूषाभिर्भूषयामा
सचेंदिरा॥११॥अंगुलीयकरत्नानिसर्वस्येवांगुलीषुच॥आदर्शंदर्शयामासधातिर्देवस्यस
न्निधौ॥१२॥दृष्ट्वादर्शेदेवदेवोप्यधैर्यंपुत्रंस्वयंदधौ॥आरुह्यगरुडंपश्चात्स्वयंलक्ष्मीसमन्वि
तः॥१३॥अलेरावजीवरुणयमयेक्षरासेवितः॥वसिष्ठाद्यैर्मुनींद्रैश्चसनकाद्यैश्चयोगिभिः॥१४॥

भलैर्भगवतैर्युक्तो नारायणपुरःसरैः॥ जगुर्गंधर्वपतयो ननृतुश्चाप्सरोगणाः॥१५॥ देवदुंदु
भयो नेदुस्तदादेवस्यसन्निधौ॥ जयेतिस्वस्तिसूक्तानिप्रणेमुस्तंसमंययुः॥१६॥ देवो देवगणैर्युक्तो
विष्वक्सेनादिपार्श्वदैः॥ सखिभिस्पंदनस्थाभिर्बकुलाद्याभिरन्वितः॥१७॥ आकाशराजस्यपु
रमासमासास्वलंकृतं॥ देवमागतमालोक्य कन्या मैरावतास्थितं॥१८॥ पुरींप्रदक्षिणीकृत्यगो
पुरद्वारमागताः॥ आलोक्याकाशराजोपि समानीयेनयत्नतः॥१९॥ बंधुभिः सहितस्तस्तौदेव
मालोक्यकेशवं॥ विष्णुमालांस्वकंठस्थांकृत्वादायससंभ्रमः॥२०॥ कमलालयास्कंधदेशमु
न्मोच्यसुप्रभोरगं॥ आदायमालिकामालांसास्यकंठेसमर्पयेत्॥२१॥ एवंत्रिवारंतौकृत्वा
वारुणादवरुह्यच॥ स्थित्वापीठक्षणंपश्चात्कृतंविधिविधानतः॥२२॥ ब्रह्मादिदेवयूथेश्वस ८३
हितोभूमिजारुहिं॥ मागत्यसूनंबेयादिसंकुराप्यर्णमक्षतैः॥२३॥ वेदादिकैःकारयित्वाला

जालोमेतमेवच॥ अतादेशानमाज्ञप्तोराधीतोकमलारुहिः॥२४॥ चतुर्थेदिवसेसर्वैःसमाप्यचतुर्मु
खैः॥ अनुज्ञाप्यविधात्राजंआरोप्यगरुडोरुहिं॥२५॥ देवीभ्यांसहितोदेवोदेवैर्गंतुंप्रचक्रमे॥ दिव्यदुंदु
भिनिघोषैःसंप्राप्यवृषभाचलं॥२६॥ तुष्टुवुर्देवदेवेशंब्रह्माद्यादेवतागणाः॥ शुकादयोमुनिगणा
स्तुष्टुवुःपुरुषोत्तमं॥२७॥ स्तूयमानोथदेवोपिविधेशमणिमंडपं॥ रमाधरोनिजाभ्यासतत्रचित्रा
सनंययौ॥२८॥ आकाशराजोपितदामहेंद्रादिसुरैःसहपुत्रैश्चविष्वाप्रियार्थंतुप्रभृणंकरैर्मु
घृताः॥२९॥ सौवर्णेषुकराडेषुतंदुलास्खालिसंभवाः॥ मुक्तफलान्यनेकानिघृतकुंभशतानिच॥३०॥
पयोधरसरुस्त्रालिदधिभांड्यनेकशः॥ वार्तांकचूतकदलीनारिकेलफलानिच॥३१॥ धात्री
फलानिकृष्णोरुराजरंभफलानिच॥ फणसान्नतुलिंगानिराकीफरितानिघटान्॥३२॥ सुवर्णमपि
मुक्तोथक्षौमंवस्त्रकोट्यंबराणिच॥ दासीदाससरुस्त्राणिकोटिशोगास्तथैवच॥३३॥ तुंगानामित्य

मतानोराजानामंधिकेरतो॥ अंतःपुरवरानारीरूपगीतविशारदा॥३४॥ ददौचतुःसरूस्थाणिनिजा
सायचविष्णवे॥ दत्वाचैतानिसर्वाणिलक्ष्मीदेवपुरोविभुः॥३५॥ हस्वादेवीपितास्यर्वदेवीभ्योसहि
तोहरिः॥ सुप्रीतमारुराजानंश्वसुरंव्यंकटेश्वरं॥३६॥ स्वरंरणीप्वेरुराजनगुरोरमतोयादक्षसिं॥इति
श्रीरावचः॥ श्रुत्वा वियद्राजोवदद्विभुं॥३७॥ तत्सेवैदेहदेवेत्वंभयादव्यभिचारिणी॥ मनस्त्वत्पाद
कमलेतायिभक्तिर्ममास्त्वयो॥३८॥ श्रीभगवानुवाच॥ त्वयायदुक्तंराजेंद्रतत्सर्वंभविष्यति॥इति
दत्वावरंतस्मैसोमाय्येवयथोचितं॥३९॥ ब्रह्मेशादिसुरान्सर्वान्समभ्यर्चयथोचितं॥स्वलोक
गमनायैवमनुमेनमुदाहरिः॥४०॥ गतेषुतेषुलोकेशश्रियाभूम्निजयायुतः॥ विरेजेसयथा
पूर्वंस्वामीपुष्करणीतटे॥४१॥ आस्तेदिव्यालयोदेवोप्यर्चमानोगुहेनवै॥४२॥ ॥इतिश्री
वाराहपुराणेक्षेत्रकांडेव्यंकटगिरिमाहात्म्येकमलालयापरिणयनंनामषड्विंशोध्यायः॥२६॥

धरण्युवाच॥ कस्मिंश्चिद्धरेभूधरेकेनचेद्रसोप्रिये॥ विमानंकेनतेदेवंकायेतस्मिन्महीधरे॥१॥ श्रीनिवा
सेविकेनैवदृश्यसेसुभगाकृतिः॥ एतन्मेहृदिममप्रीत्याश्रोतुंकौतूहलंविभो॥२॥ श्रीवराहउवाच॥ वक्ष्यामि
शृणुहेदेवीभविष्यद्वृत्तमितो॥ अस्मिन्महीधरेपुण्येनिशादोवसुनामकः॥३॥ श्यामाकवनपालोभद्रक्षि
मापुरुषोत्तमे॥ श्यामाकृतंउलाय्यक्षीमधुनापरिषिच्यच॥४॥ निवेद्यदेवदेवायश्रीभूमिसहितायच॥ए
वंभक्तिमतास्तस्यभार्योचितवतीशुभा॥५॥ आसूतनयंबालंवीरनामानमुत्तमं॥ वसुःपुत्रेणसहितोभार्या
यापतिभक्तया॥६॥ कस्मिंश्चिद्दिवसेपुत्रंश्यामाकंपालयेतिच॥ विसृज्यपत्न्यासहितोमध्यन्वेषणतत्परः॥
॥७॥ गतोयनांतरेरौद्रंमधुछत्रंददृक्षया॥ बालःश्यामाकपक्वानिगृहीत्वागोनिधायच॥८॥ दृष्ट्वा
निवेदयामासयद्धमूलैःश्रियःपतेः॥ नैवेद्यंभक्षयित्वैववीरस्त्यासमुवेनवै॥९॥ तदंतरेवसुश्चापिम
ध्याह्नायसमागतः॥ श्यामाकान्भक्षनिर्लोनान्दृष्ट्वातंसुतमात्मनः॥१०॥ रवद्भमादायतंहंतुंत्वरयाहस्त

मुपतौ॥तद्दक्षस्य सदा विष्णुः स्वयं जग्राह पाणिना॥११॥स्वयं गृहीतं केनेति पश्यन्दक्षंददर्श सः॥शं
खचक्रगदापाणिं लक्ष्मूर्त्यर्थविग्रहं॥१२॥सुत्वा वसुश्चतं स्वयं प्रणम्योवाच केशवं॥किमिदं देवदेवेश
शंखेष्टितं क्रियतेतदा॥१३॥श्रीभगवानुवाच॥सौश्रृणुष्वयोमत्तुभस्तोभक्तिमान्मयी॥त्वतोविप्रेप्रि
यतमः तस्मान्प्रत्यक्षमागतः॥१४॥ओमस्यसर्वभूतिष्टामितस्त्वाप्रिसरस्तटे॥इतिदेववचः श्रुत्वा प्रीति
मानभवद्वसुः॥१५॥एतस्मिन्नेवकाले तु पांडयदेशात्समागतः॥बात्यात्मभूतिश्रोविविष्णुभक्तिः
समन्वितः॥१६॥श्रीनारायणंपुरिंप्राप्यश्रीवराहप्रणम्यच॥तत्रभूत्वाश्रियासंख्यंकटाद्रिनिवासिनं
॥१७॥स्वयंचदेवदेवेशंसेवितंप्रथमौगतः॥सुवर्णपुष्करिंप्राप्यस्नात्वाचोत्तरितटे॥१८॥कमला
ख्येसरस्यिचस्नात्वापुण्यप्रदायिनी॥तत्तीरेवासिनंदेवं कृष्णाग्रेषासंस्थितं॥१९॥नमस्कृत्वाततःदत्तं
गजदशायुतं॥स्वनैःसंप्राप्यशोणाद्रिंनिर्झरंसददर्शह॥२०॥तत्समीपेसमासाद्यकपिलाकृजितंशिवं॥

तत्पुरश्चक्रतीर्थंतद्गाधंपापनाशनं॥२१॥तत्रस्नात्वाततोगच्छेत्कृष्णैरानैःरानैः॥७आरोढुंगच्छतामार्ग
मेपुरुषोवैखानसेनच॥२२॥रंगेदासस्त्वारुरोहबालोदादशवार्षिकः॥स्वामिपुष्करणीं प्राप्यस्नात्वा
भक्तिसमन्वितः॥२३॥वैखानसेनमुनिनागोपीनाथेनपूजितं॥वनमध्यततोमूले स्वामीपुष्करणी
तटे॥२४॥तिष्ठंतंपुंडरीकाक्षंश्रीभूमिसहितंहरिं॥आकाशेस्थंसहस्रेवपातालोत्तोलतीं शुभं॥२५॥
पार्श्वस्थंशंखचक्राब्यांगदासीक्यांनिसेवितं॥पश्यौविस्तार्यचाकाशेदेयमूर्ध्निवितानयत्॥२६॥
स्थितंचगरुडंदृष्ट्वानंपश्चाताद्दशतंतथा॥एवंविधंश्रीनिवासंविस्मितोरंगदासकः॥२७॥अस्य
देवस्यचारामेकरिष्यामीत्यचिंतयत्॥निश्चित्यमनसासर्वंतरुमूलेवसत्सुधीः॥२८॥कृत्वाथैरवन
सादिष्टोनैवेद्यंचदिनेदिने॥रानैरुत्वावनंघोरंरक्षांसिछेदपार्श्वगान्॥२९॥आस्थायनिधिंचादे
वस्यरमायांश्चंपकंतरुं॥देवालयोपर्जयित्वातुभोदेवसेवितः॥३०॥देवस्यपरितोभूमौरित्वाकु

ज्येतदा करोत्।।तत्कुंडस्यैवपतितःपुष्यारामंचकारह।।३१।।मल्लिकाकरवीराअंकुरमंदारमालती।।तुल
सीचंपकानांतुवनान्येवंचकारह।।३२।।अरामपुष्पाण्यादायस्वयंदामान्यथाकरोत्।।विचित्राणित
थाबध्वापूजकस्यकरेददौ।।३३।।आदायपूजकस्तानिस्केधेमूर्ध्निबबंधच।।श्रीनिवासस्यदेवस्य
श्रीभूमिसहितस्यच।।३४।।एवंदेवस्यकैकर्यंकुर्वन्नासउदारधीः।।तस्यैवंवर्तमानस्यसमास
त्यविनिर्गताः।।३५।।कर्षणेपुष्पापचयेरंगदासेमहात्मनि।।अरामेससिस्थातुंगंधर्वःकश्चिदा
ययौ।।३६।।गंधर्वराजकन्याभिःसमन्वितःसजलक्रीडांकरोतिस्मदिव्यांप्यविमान
कः।।३७।।सुरूपाभिश्चसहितंक्रीडंतंकमलासरे।।पश्यन्श्रीरंगदासोयंविस्मितोमात्यसंचये।।३८।।
जितेंद्रियोवितक्रीडांपश्यन्खेतःससर्जह।।पश्यतस्तस्यसरसःसमुत्तीर्यमनोजहः।।३९।।दिव्यव ८६
स्त्राभिरन्याभिरप्सरोभिःसहस्रशः।।अधिरुह्यविमानेतंययौसधनदालयं।।४०।।गतेगंधर्वराजे

तुरंगदासोविमोहितः।।त्यक्त्वाविमाणिमात्यानिस्नात्वासरसिलज्जितः।।४१।।पुनरागत्यपुष्पाणि
श्रानेदेयात्ययंययौ।।वेरवानसमुत्थंदृष्ट्वाऽथकालमतीत्यच।।४२।।आगतंकिमितिप्राहसरवे
तिक्रम्यचागतः।।नकुद्धामालिकाश्रावित्वयारामेवकिंकृतं।।४३।।श्रीवराहउवाच।।इत्थंपृष्टो
रंगदासोनावदद्दूयतामात्मा।।नेजितंरंगदासंतंप्रोवाचमधुसूदनः।।४४।।श्रीभगवानुवाच।।
लज्जियाकिंरंगदासमत्यात्वंमोहितोत्यसि।।नत्वावद्दूजितःकामस्त्वंधीरोभवमत्समः।।४५।।
गंधर्वराजवद्राजाभवित्वाश्रिमलौकिकं।।तत्रभुक्त्वामहाभोगान्मद्भक्तिमान्प्राप्यसर्वदा।।४६।।मा
कंचविमानंचकारयिष्यसिमेतदा।।तत्रमुक्तिंप्रदास्यामिप्रीत्यापरमपावनः।।४७।।अत्रैवकुरुसे
वात्वंअशरीरविमोक्षणात्।।मद्भक्तानांसकामानांमेवमुक्तिर्भविष्यति।।४८।।इत्युक्त्वातंतोवि
ष्णुपुनर्नोवाचकिंचन।।श्रुत्वातद्रंगदासोविचकारारामुत्तमं।।४९।।सागरांतादृश्यित्वागतः

स्वर्गमनन्यधीः॥जातः सोमकुलेतुंगेतुंडमानिति विश्रुतः॥५७॥सुधीरतनयो धीरो नंदिनी गर्भसं
भवः॥सर्वेचवर्षाद्रुद्राविष्णुभक्तः स्वयंसुधीः॥५९॥सुशील्यधीर्यशौर्यादि गुणानामकरोमहान्॥
पोज्यस्यतनयोपद्मांउपयेमेमनोहरां॥५२॥ततोराजाशीलंकपानतादेश्यास्वयंवराः॥रेमेदेवै
८७ वृद्धौनारायणपुरेवसन्॥५३॥अथलुब्धाप्यस्वपितरंपुत्रः पंचास्यविक्रमः॥उद्दिश्यमृगयांधीरो
व्यंकटाद्रिसमीपतः॥५४॥पादचारेणविचरन्परिवारैः समन्वितः॥मदधारविमुंचंतंददर्शगज
यूथपं॥५५॥तंदृष्ट्वाविस्मितोभूत्वागृहीतुंतमनुद्रुतः॥सुवर्णमुरवारिंतीर्त्वादृष्ट्वाश्रमऋषिंशुकं
॥५६॥नमस्कृत्याभ्यनुज्ञातःततोगच्छन्नगंतरं॥ददर्शहरिणीदेवीयस्मिंकांतरसंस्थितां॥५७॥ए
ष दामिष्टभक्तानांदिव्यरामनिवासिनी॥परिवारैः सदोवेतांपूजितांत्रिदशैरपि॥५८॥तुंडमान ८७
वितानत्यातपश्चासुरवोणयौ॥पंचवर्णंशुकंदृष्ट्वातेजिघृक्षुरनुद्रुतः॥५९॥सचदंष्ट्रीनिवासे

तिगिरिंगिरिश्रेष्ठंययौ॥अनुद्रुवत्सराजाविगिरिराजंसमारुहत्॥६०॥ददर्शविविधाःपश्यन्
खराणिस्वमेततः॥शुकमन्वेषमाणोसौरयामाकथनमेविभोः॥६१॥तमदृष्ट्वाशुकवरंवनपा
लंददर्शह॥सतुराजानमायांतंप्रत्युद्गम्यससत्वरः॥६२॥प्रणम्यविनयोपेतःकृतोजालिर्यु
टस्थितः॥तुंडमानविसंकल्पंतंप्रोवाचवरेश्वरः॥६३॥पंचवर्णशुकःकश्चिद्दृष्ट्याऽऽगतस्त्व
या॥श्रीनिवासेतिचवदन्क्वगतोसौवनेचरः॥६४॥वनेश्वरउवाच॥सपंचवर्णोराजेंद्रोश्री
निवासप्रियःसदा॥पार्श्ववर्तिसदालस्यश्रीभूम्याचविवर्द्धितः॥६५॥स्वामिपुष्करणीतीरे
सदासोदेयसन्निधौ॥गृहीतुंसशुकःश्रीमान्नैकेनाविक्ष्यतिध्रुवं॥६६॥विहत्यश्वेछयानि
त्यंभास्किन्गिरिवरेशुभे॥दिनांतेदेवमासाद्यतत्रस्थोवेदसत्यया॥६७॥तंदेवमाराधयितुं
गामिष्यामिन्नपात्मजः॥विश्रम्यतांक्षणमत्रेयावदागमनंमम॥६८॥पुत्रेणानेनसहितोविर

रुत्वेमथासुरवो।राजोवाच।।त्वयासदृगाभिष्याभिदृष्टदेवंजनार्दन।।६९।।त्वमेवदर्शयदेवैरांध्येक
दाद्रिनिवासिने।।तस्यराजावचःश्रुत्वारुद्यामाकंमधुमिश्रितं।।७०।।चूतपत्रपुटेमित्वारांतरा
सरयोरुहं।।गत्वासदूरमध्यानंपरयंतौतौरितंतदा।।७१।।सुहृत्तीर्देवसंप्राप्तौस्यामि
पुष्करणींशुभां।।स्नात्वाभिविधानेनतेनरातानिषादजः।।७२।।दर्शयामासदेवेशंराजसं
स्यमलात्मनः।।स्यामापुष्करणीतीरेस्थितंश्रीवृक्षमूलकं।।७३।।अतसीपुष्पसंकाशंपी
नायतचतुर्भुजं।।चतुर्भुजमुदारांगंईषत्स्मितमुखांबुजं।।७४।।दिव्यपीतांबरधरंकिरीटक
टकोज्वलं।।पार्श्वस्थाभ्यांस्वशक्तिभ्यांश्रीभूम्याचसमन्वितं।।७५।।पार्षदैःशंखचक्रादि
रार्द्धंसुशोभितं।।अन्यैर्दिव्यायुधैश्चापिदिव्यरूपैर्निषेवितं।।७६।।स्कंधेनाराधितंदेवंश्रीस
ध्यंपुरुषोत्तमं।।वल्मीकरूढपादाब्जंअजानुपुरुषोत्तमं।।७७।।दर्शयित्वामुदादेवंप्रणेमेतु

रुभौतदा।।राजातुप्रोज्झितंभूत्वाविस्मयोत्फुल्लवीक्षणः।।७८।।आनंदप्लुतसर्वांगोनप्रज्ञायताकिंचन।।
निषादोविनिवेद्यैवश्यामाकंमधुमिश्रितं।।७९।।राज्ञातदर्धदत्वैवशिष्टंभुक्तवान्स्वयं।।पीत्वास
पुष्करणीतोयंतेनराज्ञासमन्वितः।।८०।।स्वपुरःश्यामाकवनेपुण्यापर्णकुटींययौ।।उषित्वाचैक
रात्रंतुप्रातरुत्थायभूमिपः।।८१।।ससैन्येनसमायुक्तोनिर्ऋतःस्वपुरंययौ।।पुनर्देवीवनेगत्वाश्रया
दवाप्तास्वयं।।८२।।चैत्रेशुद्धनवम्यांचपूजयामासरेणुकां।।हविष्यंपरमान्नंचोपस्करमनेकदा।।
।।८३।।पुष्पहारसहितंधूपदीपसमन्वितं।।सुराघटगतांगत्वाजातीकेसरवासितं।।८४।।एवं
संपूजितादेवीप्रीत्योराज्ञोवरंददौ।।प्रविष्टापुरुषेकस्मिन्भयदंनृपसत्तमं।।८५।।शृणुराजन्
भविष्यंतेराज्यंनिहतकंटकं।।राजंतवैवनाम्नाचराजधानीभविष्यति।।८६।।सत्यमापेमहान्
वीरोराज्यंकरिष्यसि।।देवदेवप्रसादश्चभविष्यतितवानघ।।८७।।इतिदत्वावरंतस्मैआविष्टः

श्रुतिंययौ॥ततोत्र्यवरोराजायथोशुकमुनिंपुनः॥८८॥अभिगम्यमुनिंतेनपूजितेमुदितोथ
दत्॥महात्म्यंसरसोश्रद्धिकमत्कारय्यप्रेमुनेः॥८९॥श्रीशुकउवाच॥पुराहुर्वाससःशापाद्
वाचितीर्णोसुरालयान्॥पद्मापद्माक्षदयितोविष्णुतासहितान्नृप॥९०॥स्वरकांचनपद्माढ्यंइदं
माप्यमहेश्वरी॥तपश्चचारवर्षाणांदिव्यानामयुतंरमा॥९१॥तुतोषदेवाविधिवच्चतः॥श्रियंविष्णुस
माविशत्॥पुरंदरेणसंयुक्तोराजन्नास्मिन्सरोवरे॥९२॥संस्थितांस्वर्णकमलेपुंडरीकाक्षसंयुताम्
दृष्ट्वाप्रीतिसमायुक्ताःप्रणम्यांबुजधारिणीं॥९३॥कृतांजलीपुटयेदासकृतुष्टुवुर्कमलां।
देवाऊचुः॥नमःश्रियैलोकधात्र्यैशंलमाद्येनमोनमः॥९४॥नमस्तेपद्मनाभायैपद्मपुरुष्येनमोन
मः॥प्रसन्नपद्मपुरुष्यायैपद्मेक्षायैनमोनमः॥९५॥नमोवित्यवनस्थायैविष्णुपत्न्यैनमोनमः॥
विचित्रश्रीमधारिण्यैपृथश्रोण्यैनमोनमः॥९६॥पद्मेचित्यपद्मकरायैपद्मगंधिन्यैनमोनमः॥ ८९

सुरूपपद्मपाक्षेकरपादतलेशुभे॥९७॥सरक्तांगदकेयूराकांचिनूपुरशोभिते॥यदेषकश्चिन्मर्त्ये
सरसीगेकटंकीर्त्यते॥९८॥मांगल्याभरणोश्चित्रैमुक्तालारैर्विभूषिते॥तटंकैरयुतंसैन्यशो
भमानमुखांबुजे॥९९॥पद्मरूपेनमस्तुभ्यंप्रसीदहरिवल्लभे॥ऋग्यजुःसामरूपायैविद्यायै
तेनमोनमः॥१००॥प्रसीदास्मान्कृपाहृद्यैपालैरत्नोकयाधिजे॥हस्त्यानराणांअश्वत्थंशिवत्वं
इत्यमास्तुयुः॥१॥श्रीशुकउवाच॥इतिस्तुतातदादेवैविष्णुवक्षस्स्थलस्थाश्रयाविष्णुनासहसंह
ष्यारमामित्रावदत्सुरान्॥२॥श्रीरुवाचसुरश्रेष्ठसहसोहत्यास्यपदानिगाःप्रिष्यथायेस्थान
हीनाश्चस्थानाभीप्सितायेनराभुवि॥३॥तेमानवेनस्तोत्रेणस्तोत्रंकृत्वास्थानमवाप्नुयुः॥अश्वत्थे
प्रित्यपत्रेमांअर्चयंतिनराभुवि॥४॥स्तोत्रेणानेनयेदेवानराःपुष्पस्तुतेनये॥धर्मार्थकाममोक्षा
णांआकारास्तेभवंतियै॥५॥इतिपद्मसरोदेयायेकेचनरसभुवि॥प्रातःस्नानंकरिष्यंतिमांस्तुत्वा

विष्णुवल्लभां ॥ ६ ॥ तेविश्रियं दीर्घमायुर्विप्रान्पुत्रान्सुवर्चसः ॥ तेभ्योभोगांश्चभुक्तांतेनरामोदेक
मवाप्नुयुः ॥ ७ ॥ इतिदत्त्वावरं देवीदेवेनसहविष्णुना ॥ आरुरुक्षुगरुडेशार्ङ्गंवैकुंठंस्थानमाययौ
॥ ८ ॥ ॥ इतिश्रीवाराहपुराणेक्षेत्रकांडेध्यंकटगिरिमहात्म्येपद्मसरोवरवर्णनंनामसप्तभिशो
ध्यायः ॥ २७ ॥ ॥ श्रीशुक उवाच ॥ देवपद्मसरोनामराजन्यापप्रणाशनं ॥ कीर्तनात्स्मरणा
त्स्नानान्नृणांलक्ष्मीप्रदंभुवि ॥ १ ॥ कृत्वास्नानंत्वमप्यस्मिन्व्रजस्वपितुरंतिकं ॥ श्रीवराहउवाच ॥
एतच्छ्रुत्वचवचःप्रत्यासाद्यपद्मसरोवरं ॥ २ ॥ तंनत्वाहृयमानस्यतुंडमानस्यपूरयौ ॥ तेपितायु
वराजानंकृत्वासश्रीवराथथ ॥ ३ ॥ राजकर्त्तव्यसामर्थ्यशौर्यवीर्यसुशीलतां ॥ भक्तिंविनेषुसु
मत्स्यवीक्ष्यराजास्वमंत्रिभिः ॥ ४ ॥ स्वपदेस्थापयामासस्वाभिषिच्यविधानतः ॥ अनुनीय ९०
सुतंतंवैपत्न्यासार्द्धंवनंययौ ॥ ५ ॥ तुंडमानपितास्राज्यंतत्याराज्यंचकारह ॥ सूतउवाच ॥

निषादस्यवनेदेवोवराहरूपमास्थितः ॥ ६ ॥ श्यामाकपक्वंभक्षयित्वाराज्ञोचकारह ॥ पदानिसवराहस्य
चान्वियेषदिवादिवा ॥ ७ ॥ अहृष्टवातंवराहंसराजोजाग्रद्धनुर्धरः ॥ स्थितोपश्यच्चरंतंतंचंद्रकोटि
समप्रभं ॥ ८ ॥ वराहंसुभगाकारंश्यामावेवनमध्यगः ॥ तंदृष्ट्वाधनुरादायसिंहनादंचकारह ॥ ९ ॥
वराहस्यध्वनिश्रुत्वावेगान्निष्क्रम्यसत्वरं ॥ एवंतंचाणतुंडयोवराहंचनिषादयः ॥ १० ॥ रात्रिशेषम
तुदृश्यव्रजेचंद्रसमप्रभं ॥ वल्मीकंप्रविशंतंचेददर्शसनिषादयः ॥ ११ ॥ गछंतंपूर्णमाचेद्भस्मांग
रियंयथा ॥ विस्मयोवनयत्कोपादत्मीकंसनिषादयः ॥ १२ ॥ धरणीवराहदृष्ट्वोद्भूर्छांनिप
पातह ॥ पितरंमूर्छितंदृष्ट्वातत्पुत्रोभक्तिमांस्तथा ॥ १३ ॥ वराहदेवंतुष्टावयेनप्रीतोभवद्धरिः ॥
आविश्यपितरंतस्यप्रोवाचमधुसूदनः ॥ १४ ॥ श्रीभगवानुवाच ॥ अहंवराहोदेवेशोनित्यमस्मि
न्वसाम्यहं ॥ राजेत्यमुक्त्वामामभंप्रतिष्ठाप्यैवपूजये ॥ १५ ॥ वल्मीकंकृष्णगोक्षीरैस्नापयित्वातदु

स्तिते॥ श्रीलतालतलेचवराहं उपरत्यधरणीं कितं॥१६॥कारयित्वाप्रतिष्ठाप्यविप्रैर्वैखानसैश्चयः॥पू
जयेद्विधिवद्भोगैस्तुष्टोमानृराजसत्तमः॥१७॥इत्युक्तालंजलौदेवःसचस्वप्नोबभूवह॥सुरवा
सीनंतुपितरंनमस्कृत्यानिषादजः॥१८॥न्यवेदयद्देववचःपित्रेसर्वंयथातथं॥सहृतोविस्मितोभू
त्वाहृत्स्पृष्टपुत्रवचःशुभं॥१९॥राजेवत्कुरुयोगींद्रनिषादःस्वासुतैःसह॥वसुर्निषादोधिपति
राजद्वाजमुपागमत्॥२०॥निषाधपतिमालोक्यकुमुक्तामत्तद्वारपालैर्नृपोत्तमः॥आहूयतं
निषादेशंसंभाष्यांमंत्रिणासह॥२१॥सत्कृत्यतंचसुराजासपुत्रंसपरिच्छदं॥पप्रच्छप्रीतिमा
न्राजावसंतंवनगोचरं॥२२॥किमागमनहेतवेतदंतंवनगोचरं॥चसुरुवाच॥राजन्म
मवनेदृष्टमाश्चर्यंशृणुभूपते॥२३॥कश्चिच्छ्वेतोवराहश्चश्यामकामचरंनिशि॥तंवरा ९१
हंधनुष्पाणिरन्वधावमहृन्नृप॥२४॥अनुदतोवायुवेगोगत्वावल्मीकमाविशत्॥श्यामि

पुष्करणीतीरेपश्यतोममभूपते॥२५॥वल्मीकिनखनन्कोधान्मृत्तिकांन्यपतद्भुवि॥मत्पुत्रोपंसमा
गम्यमांदृष्ट्वामृत्तिकांभुवि॥२६॥शुचिर्भूत्वादेवदेवंतुष्टावमधुसूदनं॥ततोमविस्मयाविष्टव
राहोप्यवदत्सुतं॥२७॥राजेनिवेदयक्षिप्रंमन्त्रिभिर्निषादय॥कृष्णगोक्षीरसेकेनवल्मिकंक्षा
लयेन्नृप॥२८॥इक्षतेचस्थितंतत्रकाचिद्वल्मीकमध्यगं॥वामांगुष्ठंभुवंभोवराहंवदनांबु
जं॥२९॥कारयित्वाश्रीत्रियनाथप्रतिष्ठाप्यमुनीश्वरैः॥वैखानसैर्वेदविद्भिर्यजेतुंडमाभवि॥३०॥
अथगत्वाश्रीनिवासंवल्मिकाकृतयंदयं॥कपित्थाक्षंगोक्षीरंसेवनैःक्षालयंत्वनैः॥३१॥
अपादपीठपर्यंतंक्षालयित्वादिनेदिने॥कुर्यात्माकारमुन्नयोत्तरेदक्षिणेतथा॥३२॥इत्युक्ता
चैवमामुक्तेदेवस्यस्वोभवन्नृप॥इदंवरंसमादायदेवदेवचिकीर्षितं॥३३॥सतउवाच॥७
तुंडमानथतंकृत्वासुप्रीतोविस्मितोभवत्॥ततःकार्यंविनिश्चित्यमंत्रि
भिःपुष्करादिभिः॥३४॥

व्येकदाद्रिंजिगमिषुंगोपानाहूयसर्वतः॥रूप्याश्वकपिलागावोयाःकाश्चि
त्संतिमामकाः॥२५॥ताःसवत्साअनायध्वंव्येकदाद्रिसमीपतः॥इत्याज्ञप्यनृपोगोपान्श्यार्यात्ये
तिचमंत्रिणः॥२६॥विसृज्यप्रकृतीःसर्वाविवेशांतःपुरंश्री॥उत्काकथांतांपत्नीभ्यसुप्त्वापि
निशिपार्थिवः॥२७॥तंसत्यश्रीनिवासोविबिलमार्गंयदर्शयत्॥स्वपुरादाबिलंमार्गंपद्मवान्व्यस
जद्धरिः॥२८॥एवंस्वप्नंनृपोदृष्ट्वाप्रातरुत्थायसत्वरः॥आकृयप्रंजिणःसर्वान्सकृतश्रीजिणानपि॥३९॥
स्वप्नंतथाविधंचोत्काकथयद्रथपत्नयो॥युक्तेमुकुतेप्रययोरूयमाकृत्यतुंउमान्॥४०॥पश्यश्यप
लूयात्मगेहानेःप्रीतोयंयौबिलं॥दृष्ट्वाविस्मयमापन्नानिर्मेलत्रपहृणं॥४१॥बिलमंतःपुरे
रुत्वाप्राकारंचाप्यकारयेत्॥वसंतस्तत्रनृपेंद्रोसौविजित्यपृथिवीमिमां॥४२॥यथोक्तंदेवदे ९२
वेनक्षीरप्रक्षालनादिकं॥कृत्वाप्राकारानिर्माणंकर्तुमुद्योगमाययौ॥४३॥तदानींदेवदेवेनस्वय

मात्मापितोनृपः॥चिंचिणी-चंपकं-चाभोपालयेतौनगोत्तमौ॥४४॥मामकंस्थानकंचिच्चालक्ष्मा
स्थानंचचंपकं॥नमस्कार्यैर्नृपेतौहिऋषिदेववरैःसदा॥४५॥संस्थाप्यतौनृपश्रेष्ठछंदयोत्पा
लकालतः॥प्राकारमंत्रकुरुमेद्वारगोपुरसंयुतं॥४६॥विमानंतुभवेद्दिव्योनाम्नानारायणोनृपः॥
कारयिष्यतिमद्भक्तैःस्वर्णमालंकरिष्यति॥४७॥एवमुक्त्वातुउमांसविरामश्रियःपतिः
सूतउवाच॥एवंदेवंवचःश्रुत्वाकृत्वाप्राकारमेवच॥४८॥पूजयामासमुनिभिःवैखानस
कुलोद्भवं॥नित्यंबिलेनचागत्यदेवंनत्वानृपोत्तमः॥४९॥राज्यंचकारधर्मेणभुंजानोभोगमु
त्तमं॥एतस्मिन्नेवकालेतुदाक्षिणोद्विजसत्तमः॥५०॥गंगास्नानायगच्छंवैसदारःप्रययौपुरं
मार्गेचगर्भिणिजाताब्राह्मणीब्राह्मणस्यसा॥५१॥तांतुगर्भवतींदृष्ट्वाप्यात्मानुगमनेक्षमां॥
राजानंदृष्टुकामायोराजद्वारमुपागमत्॥५२॥द्वारस्थोनृपतेःप्रोक्तोराजानमाहूयद्विजोत्तमः॥

पूजायित्वातुविधिवत्प्रपछकुशलंद्विज॥५३॥राजोवाच॥किमागमनकृत्यंतेकिंकरिष्याम्यहंद्विज॥
द्विजउवाच॥वाशिष्टोवीरसोमोहंसामवेदोस्मिपोतगः॥५४॥सदासेनिर्गतोराजन्गंगास्नायायसा
९३ दरं॥मार्गेचगर्भिणीचेयंकौशिकिंपुण्यशीलिनीं॥५५॥नाम्नालक्ष्मीरितिख्यातासुशीलास्य
पतिव्रता॥स्नाप्यचेमांतवगृहेव्रतंनिर्वर्तयाम्यहं॥५६॥तस्मान्राजन्प्रयछास्यैयथेष्टंभर्तृयोनये॥
तावच्चरक्षतांलक्ष्मीयावदागमनंमम॥५७॥सूतउवाच॥राजातस्यवचःश्रुत्वातंपुत्रानिधि
नान्यधिनदत्वाषण्मासपर्यंतंगृहंप्रतःपुरेददौ॥५८॥ततएवब्राह्मणःप्रीतोगंगास्नायैनिर्ययौ॥
गत्वाभागीरथीगंगांप्रयागेक्षेत्रमुत्तमे॥५९॥स्नात्वाकाशीततोगत्वापोषित्वादिनत्रयं॥गयां
प्राप्यपितॄश्राद्धमकरोब्राह्मणोत्तमः॥६०॥गत्वायोध्यामपिपुरींप्रययौनाबरीवनं॥स्नात्वासरय्वां ९३
ततोगत्वाप्रदेशेप्रतिनिर्ययौ॥६१॥संवत्सरद्वयेतीतेचैत्रमासिशुभेदिने॥निश्चक्रामोद्विजःश्रेष्ठः

रानैरागत्यमाधवे॥६२॥एकादश्यांशुक्लपक्षेपुनराजानमाययौ॥राजाविधिसृत्यतदाब्राह्मणंनम
स्यंनृपः॥६३॥ब्राह्मणोमानीगेदृष्ट्वाशुष्कावभूवहा॥वीरसोम्यातोविप्रोगंगातोयकरंडकं॥६४॥
जाविप्रेतंस्त्रीयतामितिचोवाचह॥ओतःपुरंततोगत्वातामपश्यत्सुतांगृहे॥६५॥स्मृत्वाथरा
णेतस्मैप्रादिश्याबिलमुत्तमं॥श्रीसूर्यंनमस्कृत्यापुनःप्राप्यबिलोत्तमं॥६६॥अतःकाञ्चन
मंदृष्ट्वाश्रीभूमिसहितंपरं॥तंदृष्ट्वाचहसोयांतंजगृहेधरणीरमे॥६७॥श्रीनिवासंप्रयो
क्ष्येनृपागताः॥नरोवदत्प्रणम्यैनंभीतोथब्राह्मणोब्रवीत्॥६८॥प्रणम्यतमथोचेतंकिंका
द्विजोत्तमाद्य॥आंदोलिकांतामारोप्यस्त्रीभिःस्वामिःसमन्वितां॥६९॥सदातेयात्पुरोभागेगच्छ
यंत्यांस्थापयेत्प्रभो॥अस्तिमेसरलास्मिन्नपमृत्युनिवारणं॥७०॥

प्राप्तजीवासमं स्त्रीभिर्ब्राह्मणेनच योक्ष्यसे॥ राजेयाहि नृपश्रेष्ठ
चनैकुरु॥७२॥इतिदेवकचः श्रुत्वा प्रययौस्वपुरं नृपः॥ऊर्दोलिका सुरम्यासु स्त्रियमारोप्य
तामपि॥७३॥ब्राह्मणंचपुरस्कृत्यदृष्टदेवंययौनृपः॥अस्तिकूटसरः प्राप्यस्नापयामासतां
स्त्रियः॥७४॥त्वगस्थिरूपांसाचाविस्नाप्यक्षिप्त्वासरोवरे॥प्राप्यजीवंयथापूर्वंस्वयंजीवत्सरी
रजां॥७५॥उत्तिलासरसिस्नात्वारात्रिमिःसर्वमंगलैः॥प्राप्ताचब्राह्मणीप्रीताभर्तारंसुन
रागतं॥७६॥राजाहारिंपुरस्कृत्यब्राह्मणायधनंददौ॥सहस्रनिष्कपर्यंतंविविधान्निच॥७७॥
स्वदेशागमनायैवसदारंद्विजसत्तमं॥विप्रंश्रुत्वास्त्रियोहृतंप्रभावंध्यंकरेशितुः॥७८॥आरा
धयुष्परायस्यदेशंप्रययौद्विजः॥विप्रेगतेश्रीनिवासोराजानंपुनरब्रवीत्॥७९॥दिनेदिनेचयम ९४
ध्यानेनेवेणानंतरंनृप॥ऊर्ध्वंगत्यमानप्यंयित्वायथेष्टंस्वर्णपंकजैः॥८०॥गत्वापुरंस्वधर्मेण

रा॥ज्येकुरुनराधिप॥यदिष्टंतवनृपभविष्यतिनसंशयः॥८१॥नागंतव्यमकालेतुत्वयानृप
कदाचन॥एवंकालंचनेकृत्वागत्वात्स्वपुरेवस॥८२॥राजाऽब्रवीत्॥तथाकरिष्येदेवेशमथा
ऽर्च्यार्चयासह॥इतिदेवीमयानित्यमर्चयत्स्वर्णपंकजैः॥८३॥सप्तऽहंतुतसीपत्रंसपश्यत्पाद
पंकजे॥विस्मितोदेवदेवेशंसपश्यन्नृपसत्तमः॥८४॥राजोवाच॥केनार्चसेसमृद्धैस्त्वंकोमले
रुत्पलशतदलैः॥सूताऽब्रवीत्॥राजन्पृच्छोदेवदेवः स्मृतोराजानमब्रवीत्॥८५॥कश्चित्कुलालो
मद्भक्तःकुर्वन्ग्रामेवसत्यहं॥स्वगृहेऽर्चयतेराजन्तदंगीकृतंमया॥८६॥इतिदेववचः श्रुत्वा
तद्दृष्टंप्रययौनृप॥गत्वाकुर्वपुरंतस्यकुलालस्यगृहंययौ॥८७॥राजानमागतंदृष्ट्वाप्रणम्येचात्म
नःस्थितः॥स्थितंतंभीमनामानंकुलालंनृपसत्तमः॥८८॥तुंबमानऽब्रवीत्॥भोमपूजयसेदेवं
कथंवदकुलोत्तम॥सूताऽब्रवीत्॥पृष्टप्राहकुलोलोविनाहंजानेनमार्चनं॥८९॥कोनोकेनृपते

श्रेष्ठं कृत्वात्रोर्वयतीतिह॥तुंडमानुउवाच॥देवेनश्रीनिवासेनमयोक्तंहित्वदार्चनं॥९०॥सलुब्धत्वा
नृपवचैःस्मृत्वादेवंवरंपुरा॥यदाप्रकाशितंपूजायदाराजागमागतः॥९१॥तुंडुवासोनसंवादःसोन
मोक्षंमविष्यति॥इतिपूर्वंवरंदेवोदत्तवान्व्यंकटेश्वरः॥९२॥इत्युक्त्वाथकृता लोविमानंव्यासाध्यस
९५ हैवचाविमानमागतंदृष्ट्वादृष्ट्वादेवंसनाईनं॥९३॥प्रणम्यप्रजलौप्राणान्त्यदातोभक्तसत्तमः॥
पस्यतोराजराजस्यविमानमधिरुह्यच॥९४॥दिव्यरूपधरोदेव्यासार्धंविष्णुपदंययौ॥हृष्टा
राजाऽतुलंलब्ध्वास्वपुरंप्राप्यहर्षितः॥९५॥स्वपुत्रेश्रीनिवासाख्यमभिषिच्यविधानतः॥परिपा
लयधर्मेणमानवेनवसुंधरां॥९६॥इत्यात्मप्यसुतंधीमान्तत्तापरमंतपः॥तपतस्तस्यदेवो
विप्रत्यक्षमभवद्धरिः॥९७॥आरुह्यगरुडंदेवोरमाभूमिसमन्वितः॥श्रीभगवानुवाच॥ ९५
किंकरोमिनृपश्रेष्ठतपसाल्लोभितस्तवः॥९८॥इत्युक्तोदेवदेवेनतुंडमानविराजराट्॥प्राति

मान्प्राञ्जलिर्भूत्वासदाहृदमुवाच॥९९॥त्वंलोकंवल्लभिजामिजरामरणवर्जितं॥इदमेव
वरंदेहिमाधवंतन्ममेप्सितं॥१००॥इत्युक्तोनिपपातोर्व्यांसाष्टांगंदंडवत्पुरः॥तथाकलेवरं
तुल्काविमानमधिरुह्यच॥१॥गंधर्वैस्तूयमानोसौसारूप्यंप्राप्यशार्ङ्गिणः॥यतोकलौहरि
तांद्विजोःसपदंयतौ॥२॥श्रीपराशरउवाच॥एतद्वेविष्णोर्देवोत्तमयोत्तंवरवर्णिनि॥यःआ
नयेद्यःशृणुयाद्विष्णुलोकंसगच्छति॥३॥सूतउवाच॥इत्युक्तोदेवदेवोसौमाविष्यंसदोत्तरं॥
शृणुयाद्यःपठेद्भक्त्याकथांपुण्यांपुरातनं॥४॥सतुमुक्तोविलोक्यामानंतंविष्णुपदंव्रजेत्॥
इतिश्रीवराहपुराणेक्षेत्रकांडेव्यंकटगिरिमाहात्म्येमृगलोपाख्यानेधरणीवराहसंवादेभवि
ष्यद्वर्णनेतुंडोपाख्यानेऋषितीर्थचरितेनामअष्टत्रिंशोध्यायः॥१३८॥ ॥मुनयऊचुः॥सूतसर्वार्थ
तत्वज्ञसर्ववेदांतपारग॥येनचाराधितःसद्यःश्रीमद्व्यंकटनायकः॥१॥भवत्यभीष्टसर्वार्थ

ANAND BHAU DA

प्रदस्ताङ्गोमुने॥रातिपृष्टस्तदास्तोप्यात्मानिचतत्क्षणं॥२॥उवाचमुनिराडूर्त्तानूश्रूयतामि
तिवैमुनिः॥आस्तिकिंचिन्मलस्तेप्यंभगवत्प्रीतिकारकं॥३॥पुरारोषेणकथितंकापिलायमहा
त्मने॥नाम्नामष्टशतंपुण्यंपावनंपापनाशनं॥४॥आदावहेमपद्मानिस्वनंदीसंभवानिच॥५
ब्रह्मातुपूर्वमाख्यंश्रीमद्व्यंकटनायकं॥५॥अष्टोत्तरशतेदिव्यैर्नामभिर्मुनिपूजितैः॥स्वा
मिंस्तत्रयात्रलासर्वलोकपितामहं॥६॥भवद्भिरविपत्रैश्चसमर्च्यस्तौश्चनामभिः॥तेषां
रोषनगाधीशमानसोत्क्षोदकारणं॥७॥नाम्नामष्टशतंवक्ष्येव्यंकटाद्रिनिवासिनः॥आ
युरारोग्यदंपुंसांधनधान्यसुखप्रदं॥८॥ज्ञानप्रदंविरोषेणमहदैश्वर्यकारकं॥अर्च्ययन्ना
मभिर्दिव्यैर्व्यंकटेशपदाब्जितैः॥९॥नाम्नामष्टशतस्यास्यऋषिर्ब्रह्मात्रकीर्तितः॥छंदो १६
नुष्टुप्तथादेवोव्यंकटेशउदाहृतः॥१०॥श्रीनीलगोक्षीरसेमृत्तोबीजामित्युच्यतेबुधैः॥

श्रीनिवासस्तथाशक्तिर्हृदयंव्यंकटाधीपः॥११॥विनियोगस्तथाभीष्टसिध्यर्थेचनिगद्यते॥
ॐनमोव्यंकटेशायरोषाद्रिनिलयायच॥१२॥हयग्रीवायचरायाथविष्वक्सेनायतेनमः॥सदं
जनगिरीशायरुषाद्रिपतयेनमः॥१३॥मेरुपुत्रगिरीशायसरस्वामितदीसुषे॥कुमारकल्प
सेव्यायवज्रहस्तविषायच॥१४॥सुवर्चलासुतान्यस्तसेनापत्यकरायच॥रामायपद्मना
भायसदायाधुसुतायच॥१५॥व्यक्तवैकुंठलोकायगुहाकुंजविहारिणः॥हरिचंदनगा
त्रेंद्रस्वामिनेसततंनमः॥१६॥रावराजन्यनेआर्तविषयायनमोनमः॥वसून्परिचरि
त्रायकृष्णायसततंनमः॥१७॥भद्रिकन्यापरिष्वक्तवक्षसेव्यंकटायच॥सनकायप्रणु
तायनमोनमः॥१८॥देवर्षिप्रमुखानेत्रदैत्यसंघप्रणाशिने॥श्वेतद्वीपकृत

रमुरुपूजिताघ्रियुगायच॥१९॥शेषपर्वतरूपत्वेप्रशास्यनपरायच॥सालुस्थापितताक्ष्य
चलेनिवासिने॥२०॥मायागूढविमानायगरुडस्कंधवासिने॥अनंतशिरसेनित्यमनंताक्षाय
तेनमः॥२१॥अनंतचरणायाथश्रीशैलनिलयायच॥दामोदरायतोनित्यंनीलमेघनिभाय
च॥२२॥ब्रह्मादिदेवसंतुष्टायविश्वरूपायतेनमः॥वैकुंठगतसद्धेमविमानांतर्गतायच॥२३॥
जगत्पाप्यर्थितश्रीशजनहग्गोचरायच॥वासुदेवायरूपेतीर्थपंचकवासिने॥२४॥या
मदेवप्रियायाथजननेष्टप्रदायच॥मार्कंडेयमहातीर्थजातपुण्यप्रदायच॥२५॥वाक्पतिर्ब्र
ह्मदात्रेचचंद्रतीर्थप्रदायिने॥नारायणाद्रिनमस्कृतायब्रह्मकुलोद्भवायच॥२६॥शारक्षचक्रग ९७
दापद्मलसत्करमलायच॥उक्षगम्यदासत्कविग्रहायनमोनमः॥२७॥केशवायपरमोत्कृष्ट

नित्ययौवनमूर्तयेभक्तार्थितार्थिप्रदात्रेचविश्रुतीर्थयशस्विने॥२८॥तीर्थस्वामीसरस्नातजना
भीष्टप्रदायिने॥कुमारधारिकास्कंधशक्तिरूपप्रदायच॥२९॥जानुदघ्नसमुद्भूतयोगिने
कुर्ममूर्तये॥किन्नरैःदृष्टरूपोत्तमप्रदात्रेमाधवायच॥३०॥वैखानसमुनिश्रेष्ठसेव्यपादपद्म
यचपरिसंस्तुतनिवासायश्रीमन्नारायणायच॥३१॥सज्जनकृतिलोकेशयनमूर्तिसंस्थायनमो
नमः॥कुमुदाक्षगणःश्रेष्ठपूजितायनमोनमः॥३२॥दुर्मेधःप्राप्यरूपेचश्रीधरायनमोनमः॥
उपत्यकामदेशस्थश्रीकरध्यानमूर्तये॥३३॥रुक्मांबुजसरोवरीकूलस्थश्रीलतयासेविने॥
लक्ष्मीलक्ष्मीकरांभोजदत्तकल्पद्रुमस्रजे॥३४॥शालग्रामनिवासायशुक्लदृग्गोचरायच॥नारा
यणार्थितारोपजनहग्विषयायच॥३५॥मृगयारसिकायाथवृषभाद्रिसुरक्षारिणे॥प्रिय
रुप्रियकोलायश्वेतकोलवरायच॥३६॥नीलधेनुपयोधारासेकदोलाङ्गवायच॥सगर

प्रियमिश्राय चोलपुत्रा प्रियायच ॥३७॥ सुधर्मिणा सुचेतन्यप्रदात्रेमधुघातिने ॥ हयग्री
व्यविप्रवेदांतदेशिकतत्प्रदायच ॥३८॥ वरतात्त्वलनाथायबलप्रमथायतेनमः ॥ त्रिविक्रमा
यपरतोदृषीकेशायतेनमः ॥३९॥ अच्युतायनमोनित्यंनीलाद्रिनीलयायच ॥ नमःक्षीराब्धि
नाथायवैकुंठाचलवासिने ॥ ४० ॥ मुकुंदायनमोनित्यंअनंतायनमोनमः ॥ विश्वाभ्यर्थिता
नीतासौम्यरूपायतेनमः ॥ ४१ ॥ सुवर्णमुखरीस्नातामनुजाभीष्टदायिने ॥ कृतायुगजग
त्तीर्थसमस्तफलदायिने ॥ ४२ ॥ गोविंदायनमोनित्यंश्रीनिवासायतेनमः ॥ अष्टोत्तरशतंना
म्नांचतुर्थ्यंतसमन्वितं ॥ ४३ ॥ यःपठेच्छृणुयान्नित्यंश्रद्धाभक्तिसमन्वितः ॥ तस्यश्रीव्यंकटे ९८
शस्यप्रसन्नोभवतिध्रुवं ॥ ४४ ॥ अर्चनायांविशेषेणश्रवणेचाष्टोत्तरंशतं ॥ व्यंकटेशाभि

धेयेत्रेव्यंकटाद्रिनिवासिने ॥ ४५ ॥ अर्चयेन्नामभिस्तस्यफलंमुक्तंप्रसिध्यति ॥ गोपनीयमि
दंस्तोत्रंसर्वेषांनप्रकाशयेत् ॥ ४६ ॥ श्रद्धाभक्तियुक्तायैवदातव्यंनामसंग्रहः ॥ इतिशेषेणक
थितंकपिलायमहात्मने ॥ ४७ ॥ कपिलाख्योमहायोगीसकाशात्तुमयाश्रुतंतदुक्तंभवतां
मयाःप्रीतिकरंहरेः ॥ ४८ ॥ ॥ इतिश्रीव्यंकटेशमाहात्म्यवराहपुराणेशेषेभकोडेव्यंकटगिरिमहा
त्म्येएकोनचत्वारिंशोध्यायः ॥ ३९ ॥ ॥ सूतउवाच ॥ श्रूयतेचयःपुनःश्रोतुंकिमिच्छं
तितपोधनाः ॥ वक्ष्यामितदशेषंवैनाभकायीविचारणे ॥ १ ॥ इत्युक्तामुनयःसर्वेप्रोचु
रेवमितंवचः ॥ मुनयऊचुः ॥ भगवान्भगवद्भक्तिक्षीरवाराशिचंद्रमाः ॥ २ ॥ व्यंकटेशास्यम
हात्म्यंयुक्तंसहामयानघ ॥ चरितंतस्यचारित्रंऔदार्यंनिखिलंतदा ॥ ३ ॥ रहस्यानित्यनामा

निरोधाद्देश्वतदीरातु॥ स्वामीपुष्करणीतीर्थमहत्वंचप्रकाशितं॥४॥अस्मद्गुरुंकालिकालादियम
हात्म्यमेवच॥ऋतंचमुनिशार्दूलसम्यगस्मामिरेवच॥५॥ओमाभ्यांपीतमेतत्त्र्यंकटेरा
कथाप्रभृतैः॥इतिचक्रेकृतेयस्यांविपासातुगरीयसी॥६॥अस्मात्वंमनुजानीहिरोगपर्व्वत्र्यंकटेशि
तुः॥इत्युक्तस्तुततः सूतः प्रोवाचमुनिपुंगवान्॥७॥गच्छध्वंमुनयोयूयंशोनः श्रीत्र्यंकयाचलं॥
तत्रगत्वागिरेः पुण्यंकृत्वोवापिप्रदक्षिणं॥८॥स्नात्वापर्यंततीर्थेषुतत्वोपर्यंतगान्सुरान्॥आरु
ह्यरत्नसानुंतंशुक्लकोकिलमंजुलं॥९॥स्वामिपुष्करणीपद्मजनघातेनरंजसा॥स्नात्वासरः स्व
र्गतीर्थेप्रदक्षिणविधानतः॥१०॥परिक्रम्यविधानंचदर्शनात्पापनाशनं॥हृदयानंदजननं
पुत्रकोटिफलप्रदं॥११॥प्रविश्यमूर्द्धरङ्चनत्वाश्रीत्र्यंकयामिधं॥श्रीभूमिभ्यांमुदायुक्तं रा
क्चचक्रवरानने॥१२॥दधानपुंडरीकाक्षंस्मयमानमुखांबुजं॥दधारसततंरंगामंदस्मितमनोहरं॥
॥१३॥

सम्यगृष्ट्वाचनत्वाचस्तुत्वानामभिरेवच॥अर्चयीत्वाचकमलैर्लक्ष्याभीष्टदुर्लभं॥१४॥कृतकृ
त्यानिवर्त्तध्वंहृत्युक्तापुनयस्तदा॥आमंत्र्यसुतंतेसर्वेप्रहृष्टाश्चप्रतास्थिरे॥१५॥भारद्वाजः कौशि
कश्चज्यावत्कौरथकश्यपः॥ऋतुर्दक्षः पुलस्त्यश्चगौतमः पुलहस्तथा॥१६॥आंगिरसोदेव
लश्चदेवदर्शनएवच॥कौत्सकश्चोमहकुंडश्चरागानंदोमहामुनिः॥१७॥मैत्रेयप्रमुखास्तत्र
गतायेतपोधनाः॥तीर्थमागीरथीपश्चात्कौशमीकृष्णावेणिका॥१८॥तत्रतत्रमहानद्यांस्नात्वा
महातपोधनाः॥त्र्यंकटाद्रिंसमागत्यतत्सजंबुनदात्मकं॥१९॥सर्वतीर्थमिदंपुण्यंसर्वसिद्धनिषेवितं॥
मंदमंजलमायुक्तंकोकिलेस्वमनोहरं॥२०॥दिव्यनिर्झरसंपूर्णंफलपुष्पद्रुमैर्युतं॥अनतिक्रम्य
सुतोक्तंसेवार्थंक्रम्यतोबुधाः॥२१॥चक्रुःश्रीत्र्यंकटेशस्यसेवांपरमपावनीं॥कुर्वंतस्तान
मंत्रेश्चनिर्झरेषुसरःसुच॥२२॥पश्यंतस्तानिरम्याणिसानुनिर्माणमं तिच॥श्रृण्वतःश्रो

श्रंधाणिपक्षिणोनोकुलान्यवि॥२३॥गायंतःसामगानिवदंतस्कृतिं॰ संतर्पिनृत्यंतः
संभ्रमात्सर्वदैवेत्थंतितपोधनाः॥२४॥उत्पतंतःपतंतश्चहर्षवेगावशंगताःगिरिप्रदक्षि
णांसम्यक्कुर्वंतस्तोत्रनैःशुभैः॥२५॥स्नात्वाकपिलतीर्थेचदृष्ट्वानत्वाशिवेहरिं॥आरुह्यमेरु
शृंगाण्यसिद्धगंधर्वसेवितं॥२६॥अत्यद्भुतोद्रिकूसानुहेमाद्रेरद्भुतोगिरिः॥अथंस्वभूतपू
र्वोहिश्रीमद्व्येंकटभूधरः॥२७॥इतिश्रुत्वैतरोसर्वेदृष्टुर्दिव्यमुत्तमं॥विमानंस्वामिनोतीर्थं
स्नात्वादेवंश्रियःपतिं॥२८॥कोटिकंदर्पलावण्यंकिरीटिनंकुटोज्वलं॥उरस्थितःश्रियःकां
तंमुक्तादामोपसेवितं॥२९॥चतुर्भुजंसुदारांगंशंखचक्रधरंविभुं॥नीलमेघनिभःश्यामं
पीतवाससमच्युतं॥३०॥श्रीभूमिसहितंविष्णुंपद्मावितपदांबुजं॥प्रणेमुःसहसादृष्ट्वाह ॥

लेत्रषोत्फुल्लविलोचनाः॥३१॥तुष्टुवुर्वेदमंत्रैश्चस्तोत्रैश्चऋतसंहितैः॥मुनयऊचुः॥ ॥
यःपार्थिवानिमणयेऽजांसिसबह्व्यवि॥३२॥विष्णोर्वीर्याणिगणयन्नितःकोषस्पशुमान्नरेः॥
श्रेयाचानिदधयत्कृत्स्नोविष्णुस्त्रिविक्रमः॥३३॥धर्मश्चयोधारयत्यसकृत्सतेविष्णवेनमः॥
पादोविश्वसिणश्चोमतस्यतस्मैनमोनमः॥३४॥ऋचःसामानियस्मात्तुत्रिरेसुगतास्तथा॥
विप्रोमुखाद्भुजाराजाययश्चोरुसंतरं॥३५॥शूद्रःपद्भ्यांमुखादग्निरिंद्रश्चमनसोविधुः॥
नेत्राभ्यांसूर्यएजत्यैतस्मैत्रिगुणेनमः॥३६॥इत्यस्तवेनगुणतांतेनियतंतेमानवाः॥बुद्धिमो
किंतुदौर्बल्याद्देवाश्चापितथैवते॥३७॥एवंस्तवेनधीरस्तुत्वाश्रीभश्चाब्जैर्मनोहरैः॥आ
दायपद्मैःपत्राणिश्रीपादंव्यंकटेरितुः॥३८॥आर्चयामासरत्युत्रैनामभिस्तुतभाक्तितैः॥

BHAU DAJI LAD MUSEUM

ततः प्रीतोजगद्राजा बभाजेव्यंकटेश्वरः॥३९॥ तत्रैवनैमिषारण्ये प्रोक्तिस्मिभवतामहं॥
व्यंकटाचलमाहात्म्यंश्रवणान्मुनयोबुधाः॥४०॥चिरकालतपात्पंऽआपिदत्तंकृतंमया
यदादिष्टंमुनींचभवतांदत्तमेवंतत्तथा॥४१॥अहोव्यंकटशैलस्यमाहात्म्यबहुदाश्चि
लोकियः॥श्रृणोतियाश्रावयंतिपठेद्वाश्रद्धयायदा॥४२॥कन्यार्थ्यसेधिरोजेणत
स्याहंसुतमोक्षदंधनंधान्यंमहाभिष्टंप्रभाग्यौभादद्याम्यहं॥४३॥ददामिसर्वका
मांश्चदेहांतेमत्पदंतथा॥रातित्वध्यवरंतौलुतस्यवत्सरपंचकः॥४४॥स्नात्वात्रसर्व
तीर्थेषुव्यंकटाद्रौतपोधनाः॥अश्रृण्वादविश्रुत्वातेसव्यगाराद्रमापतिं॥४५॥ ७

पुनश्चनैमिषारण्यंययुःसर्वेतपोधनाः॥ गत्वाचनैमिषारण्यंमुनिसंघनिषेवितं॥४६॥
उपसृत्यपुनःसूतंप्रोचुरेवमिदंवचः॥अहोत्वत्तुविज्ञानंअहोसामर्थ्यमेवते॥४७॥
यथोक्तंभवतिविष्णोर्व्यंकटाद्रिनिवासिनः॥रूपमौदार्यरूपंतुगिरिरूपंतथैवच॥४८॥
स्थितंतथैवतत्सर्वंअहोव्यंकटभूधराः॥त्वत्प्रसादाद्वयंसर्वेकृतार्थास्समहामुने॥४९॥
संस्थानंव्यंकटेशस्यगिरेस्तस्यचसर्वतः॥दृष्टमेतत्त्वयाकिंवाश्रुतंवासूतनंमुने॥५०॥
इत्युक्तस्तुततःसूतःप्राहचेदंवचस्तदा॥व्यासस्यात्मजात्सर्वंबोधितंयत्तपोधनाः॥
॥५१॥व्यंकटाचलमाहात्म्यंकल्पकोटिशतैरपि॥नशक्यंवक्तुमाहत्स्तेशेषाणांचमहात्मनां॥
॥५२॥

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

अंक०

उत्कलेत्थापिमहात्म्यंकीर्तितंकचिदेवहि।।पुण्यंपवित्रमायुष्यंमहात्म्यंमिदमुत्तमं।।५३।।
यःपठेत्प्रयतोभक्त्याश्रृणुयाद्वापिनित्यदा।।सर्वान्कामानवाप्नोतिसंप्राप्नोतिचमंगतं।।५४।।
इतिश्रीवाराहपुराणेश्रीमत्कांडेव्यंकटगिरिमहात्म्येचत्वारिंशोध्यायः।।४०।।७।।७।।
श्रीलक्ष्मीव्यंकटेशार्पणमस्तुशुभंभवतु।।श्रीसीतारामचंद्रार्पणमस्तु।।७।।७।।
शाके१७४४चित्रभानुनामसंवत्सरेकार्तिकवद्य११इंदुवासरेतादृशेदंपुस्तकंलिखितं।।
ज्योतिषिइत्युपनामकंगोपालात्मजगंगाधरेनलिखितं।।
यादृशंपुस्तकंदृष्ट्वातादृशंलिखितंमया।।यदिशुद्धमशुद्धंवामम दोषोनविद्यते।।१।।
अगस्तिपुरस्थश्रीलक्ष्मीरमणहरात्मजमाधवहरयेदंपुस्तकं।।स्वार्थेपरार्थेवा।।